# दीपशिखा

(संस्कृताध्ययनविभागस्य ई-पत्रिका)

द्वितीयः अङ्कः

सेप्टेम्बर, २०१६



रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयः

बेलुरमठः, हावडा, पश्चिमवङ्गः ७११२०२

jls

# दीपशिखा

(रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयस्य संस्कृताध्ययनविभागस्य ई-पत्रिका)

## द्वितीयः अङ्कः


उपदेष्टा

स्वामी आत्मप्रियानन्दः

सम्पादकः

राकेशदाशः

सम्पादनसहायकाः

सुमन्तचौधुरी
अमितकुमारदे
श्रीमन्तभद्रः
नित्यानन्दमान्ना

# सूची


| क्रमः | प्रबन्धः (पठितुं नुदतु) | लेखकः | पुटसङ्ख्या |
|---|---|---|---|
| १. | सम्पादकीयम् | | १ |
| २. | बुद्धस्य चत्वार्यार्यसत्यानि | सुजितपरामाणिकः | २ |
| ३. | बौद्धदर्शने निर्वाणविचारः | प्रशान्तवर्मन् | ४ |
| ४. | बौद्धदर्शनस्य सम्प्रदायाः तन्मतानि च | सुदीपमण्डलः | ८ |
| ५. | जैमिनिः | श्रीमन्तभद्रः | १२ |
| ६. | महाभाष्यग्रन्थपरिचयः | मलयपोडे | १४ |
| ७. | प्रतिबन्धकः | सौमित्र आचार्यः | १८ |
| ८. | द्वयोस्तृतीयः | सनातनदासः | १९ |
| ९. | वञ्चकप्रवञ्चनम् | सनातनदासः | २० |

# सञ्चारिणी दीपशिखा

## दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः ॥

दीपशिखेयं सञ्चरति। द्वितीयः अयम् अङ्कः। बहवः अस्याः पत्रिकायाः द्वितीयाङ्कस्य विषये अपृच्छन्निति लेखकानां सम्पादकानां च सुमहान् आनन्दः। सद्यः अवसिता शारदीया दुर्गाराधना। समागतप्राया दीपावली। देशः, विश्वं च विविधाभिः घटनाभिः आन्दोलितप्रायम् अपि उत्सवप्रियाणां मनुजानाम् उत्सवमुखरतां न नाशयितुं शक्नोति। यतः आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। तस्मात् स्वयमानन्दिताः सन्त आनन्दमुपास्महे वयम्। अस्माकम् आनन्देन जीवने सीमावर्तिनां सैनिकानां महदवदानं संस्मरद्भिः अस्माभिः तेभ्यः सक्रियतया कार्तज्ञ्यविज्ञापनमपि कर्तव्यम्। तेषां तत्परिवारजनानां च जीवनं यथा आनन्दमयं स्यात् तथा अस्माभिरपि यतनीयम्।

अस्मिन् अङ्के बुद्धदेवस्य बौद्धदर्शनस्य परिचयात्मकलेखाः यथा तथैव कथानाटकादि अपि वर्तते इति महतो हर्षस्यास्पदम्। सर्वेऽपि लेखाः रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयस्य संस्कृताध्ययनविभागस्य योग्यैः छात्रैः प्रस्तुताः इति आनन्दस्य खेदस्य च विषयः। अन्येऽपि स्वीययोगदानेन पत्रिकामिमां पुष्णन्तु इति सम्प्रार्थयामः। आरम्भान्तयोः चित्रे अपि विभागस्य तृतीयवर्षीयच्छात्रेण शुभदीपपालेन विरचिते।

सर्वेभ्यः यथास्थानं शुभविजयायाः प्रणामान् स्नेहाञ्जलींश्च विनिवेदयामः। दीपावल्याः शुभकामनाश्च वितरामः। पाठकान् लेखकान् चित्रकारं च विशेषतः कार्तज्ञ्यवचःप्रसूनैः सभाजयामः।

विद्वज्जनविधेयः
राकेशदाशः
मुख्यसम्पादकः
दीपशिखायाः

# बुद्धस्य चत्वार्यार्यसत्यानि

सुजितपरामानिकः

## भूमिका

सर्वेषां दर्शनानां चरमं लक्ष्यं भवति मोक्षः निर्वाणं, कैवल्यं वा। यतो हि जन्म प्राणिनां दुःखकारणम्। तद्दुःखं जिहासितुं सर्वानि शास्त्राणि प्रवृत्तानि। जीवः वस्तुतः स्वपुण्यपापकर्मानुसारेण सुखदुःखञ्चानुभवति। जीवस्य दुःखं भगवतापि न सह्यते, अतः जीवान् उद्धर्तुं भगवान्नस्मिन् धराधामे वारं वारम् अवतरति। एवं जीवान् उद्धर्तं भगवतः बोधिसत्त्वस्यापि अवतरणमस्मिन् धराधामे। बुद्धवचनस्य तात्पर्यं दर्शने नासीत्। दर्शनविषये स सदा सर्वदा मौनमवलम्बितवान्। कारणं हि स सम्यक्तया जानाति स्म यत् दर्शनतत्त्वप्रतिपादने जीवैः दुःखं न परिहार्यते। जीवस्य दुःखाद् मुक्तये सोऽपि निरन्तरः प्रयतमान आसीत्। तस्योपायरूपेण साधननिमित्तं तेन चत्वार्यार्यसत्यानि प्रोक्तानि सन्ति। एतानि आर्यसत्यानि बौद्धानां निर्वाणलाभस्योपायः दुःखजिहासस्य मुख्यसाधनानि। तानि चत्वार्यार्यसत्यानि तावत् दुःखं, दुःखसमुदायो, दुःखनिरोधो, दुःनिरीधमार्ग इति।

## दुःखम्

चतुर्षु आर्यसत्येषु दुःखमिति प्रथममार्यसत्यम्। बुद्धो दार्शनिकप्रश्नस्य विवेचनं न कृत्वा साक्षात् सारनाथः इत्यस्मिन् स्थाने भिक्षुकं प्रति आर्यसत्यानि उपदिष्टवान्। तस्य वक्तव्यमासीत् संसारे दुःखमेवास्ति, दुःखेन संसारस्था जनाः सन्तप्ताः सन्ति। अत आदौ तस्योपायः अन्वेष्टव्यः तद्विहाय यदि दार्शनिकतत्त्वानामन्वेषणा क्रियते तर्हि तद् मुर्खस्य परिचायकः। यथा कोऽपि बाणेन विद्धो भवति तत्र यदि बाणस्योत्पाटनं न कृत्वा केन बाणेन विद्धोऽहं , कः बाणं क्षिप्तवान् क्षत्रियः उत ब्राह्मण, कस्मात् क्षिप्तवान्, किमर्थं क्षिप्तवान् इत्यादिषु प्रश्नेषु सत्सु प्रश्नस्य सार एव न तिष्ठति। स प्रश्नो मुर्खस्य प्रश्न इव प्रतिभाति। भगवान् बुद्धो दार्शनिकतत्त्वेषु आत्मा ईश्वरः कार्यं, कारणम् इत्यादिषु प्रश्नेषु मौनमेवावलम्बितवान्। वास्तवे बुद्धस्य दर्शनं नासीत् तस्य नीतिशास्त्रमेवासीत्। तत्र आर्यसत्यानां सिद्धान्ते व्यवहारस्य अनुपमः समन्वयोऽस्ति। भगवतः बुद्धस्य मते जगति सर्वं दुःखमेवास्ति। जगज्जीवनञ्च सर्वं दुःखमयं, जन्मन आरभ्य मृत्युः पर्यन्तं सर्वं दुःखमयं, जन्म दुःखं, जरा दुःखं, व्याधिः दुःखं, मृत्युः दुःखम्, अप्रियसंयोगं दुःखं, प्रियविच्छेदं दुःखं पञ्चोपादानं स्कन्दमयमिदं शरीरं, मनः सर्वं दुःखपूर्णम्।

## दुःखसमुदयः

चतुर्षु आर्यसत्येषु द्वितीयमार्यसत्यमस्ति दुःखसमुदयः। समुदय इत्यस्यार्थः कारणमिति। वस्तुतो दुःखसमुदयो नाम दुःखस्य कारणम्। कारणं विना कार्यस्यास्तित्वं नास्ति। कार्यकारणयोः नियमोऽच्छेद्योऽस्ति। यतो हि जगति दुःखमस्ति अतस्तस्य कारणमपि अवश्यमेवास्ति। दुःखं भवति कार्यम्। जगत्यकस्मादकारणेन किमपि न भवति। कार्यमात्रमेव सापेक्षं भवति। किञ्चिदाश्रित्यैव कार्यमुत्पद्यते। बौद्धानामिदं सत्यं प्रतीत्यसमुत्पादननीते उपरि प्रतिष्ठितमस्ति। दुःखस्य कारणं भवति अविद्या, तज्जन्यमासक्तिः तृष्णा। भगवान् बुद्धो भिक्षुकान् अवदत् यत् हे भिक्षुकाः दुःखसमुदयो द्वितीयम् आर्यसत्यमिति। दुःखस्य वास्तिविको हेतुः भवति तृष्णा, यद् वारं वारं मनस्युत्पद्यते। रागेन विषयवस्तु युक्तो भवति तेन रागेन पुरुषः स्वस्य तृप्तिनिमित्तं यत्र तत्र सर्वत्र स्वतृप्तिमन्वेषति। सा तृष्णा प्रकारत्रयमस्ति यत् कामतृष्णा, भवतृष्णा, तथा विभवतृष्णा इति।

## दुःखनिरोधः

आर्यसत्येषु तृतीयमार्यसत्यमस्ति दुःखनिरोध इति। निरोध इत्यस्य शब्दस्यार्थः नाश उत त्यागः। दुःखं जिहासितुं शक्यते, दुःखस्य अन्तोऽस्ति। अस्य सत्यस्योपरि भगवान् बुद्धोऽवदत् यत्- "हे भिक्षुकाः दुःखनिरोधः तृष्णायाः अशेषसम्पूर्णवैराग्यः, तृष्णाया त्यागः प्रतिसर्गो मुक्तिः तथा अनालयः"। पृथिव्याः यत् किमप्यस्ति तद् सर्वमनित्यम्। यस्योत्पत्तिः अस्ति तस्य विनाशोऽपि अस्ति- "यद् यदुत्पत्तिमत् तत्तद् विनाशि" इति। सर्वत्रैव कार्यकारणसम्बन्धोऽनुस्यूतोऽस्ति। यदि कारणस्य नाशो भवति तर्हि कार्यस्यापि नाशो भवति। तृष्णा अविद्याग्रस्थस्य दुःखस्य कारणम्। अतस्तृष्णायां निरोधायां सत्यां तृष्णाजन्यकार्यरूपजरामरणादिदुःखमपि नश्यति। न्यायशास्त्रे उक्तमस्ति यत् कारणापाये कार्यस्यापायः। यथा मिथ्याज्ञानस्यापाये दोषापायः, दोषस्यापाये प्रवृत्त्यपायः, प्रवृत्त्यपाये जन्मनोऽपायः किञ्च जन्मनोऽपाये दुःखस्यापाय इति। तृतीयार्यसत्यसम्बन्धे भगवतो बुद्धस्य कथनमस्ति यत् - "यतो हि संसारे दुःखमस्ति तथापि तस्य निवृत्तिरपि सम्भवति"। दुःखनिरोध एव बौद्धानां मते निर्वाणमिति। तत् निर्वाणं स्वप्रत्यात्मवेदनीयम्। केवलं सिद्धपुरुषाः तेषाम् अन्तरे निर्वाणमनुभवन्ति। केवलं तृष्णात्यागेन जीवितकाले एव पुरुषः तत् स्वरूपं स्वतः प्राप्तुं शक्नोति।

## दुःखनिरोधगामिनी प्रतिपद्

आर्यसत्येषु चतुर्थार्यसत्यं भवति दुःखनिरोधगामिनी प्रतिपद्। प्रतिपद् इत्यस्यार्थो मार्गः। यदि च गन्तव्यं स्थानं भवेत् तर्हि तस्य मार्गोऽपि अवश्यमेव स्यात्। बौद्धानां मते निर्वाणं सर्वेषां प्राणिनां प्राप्तव्यं स्थानम्। अतः तन्निमित्तं मार्गकल्पनं न्यायसंगतमेवास्ति। एतस्य मार्गस्य नाम अष्टाङ्गिकमार्ग इति। अष्टाङ्गिकमार्गो बौद्धानां धर्माचारमीमांसायाः चरमं साधनम्। यदि पुरुष एतं मार्गमाश्रयति तर्हि स दुःखं नाशयित्वा परमं शान्तिस्थानं निर्वाणं प्राप्नोति। धम्मपदेऽपे उक्तमस्ति यत्- “मग्गानट्ठङ्गिको सेट्ठो” (“मार्गाणामष्टाङ्गिकः श्रेष्ठः”) इति। बुद्धस्य अष्टाङ्गिमार्गे सर्वत्र “सम्यक्” इति विशेषणं योजितमस्ति। तर्हि इदानीं प्रश्नः समुदेति यत् कस्यां दशायां सम्यक् इति कथनं भवति। तस्मिन् विषये मतमस्ति यत्- अन्तस्य मध्यता एव सम्यक्ता इति। अर्थात् कस्मिंश्चित् विषये अत्यधिकत्वं किञ्च न्युनत्वम् अल्पत्वं वा न युक्तम्। यथा उदाहरणरूपेण अत्यधिकं भोजनं शरीरस्य कष्टदायकं भवति तद्वत् न्युनत्वमपि। अत उभयोः मध्यभाग एव आश्रनीयः तदेव प्राणिनां श्रेयःकारको भवति। एवं मध्यममार्गस्य अधिकमहत्त्वत्वात् बुद्धस्य मार्गो मध्यमप्रतिपदा मध्यममार्ग इत्यभिधीयते इति “मग्गानट्ठङ्गो सेट्ठो सच्चान चतुरो पदा। विरागो सेट्ठो धम्मानं द्विपदानाच्च चकखुम”॥ इति। बौद्धानाम् अष्टाङ्गिकमार्गाः दुःखस्य आत्यन्तिकनिवृत्तेः उपायः। जीवस्य पारमार्थिकल्याणाय बुद्धस्य चतुर्थार्यसत्यस्योपदेशः। बुद्धस्य अष्टाङ्गिकमार्गः चतुर्थार्यसत्ये अन्तर्भवति। दुःखनिरोधमार्गः अष्टाङ्गिकमार्गः। दुःखनिरोधमार्गस्य अष्टौ अङ्गानि सन्ति यथा सम्यक् दृष्टिः, सम्यक् संकल्पः, सम्यक् वाक्, सम्यक् कर्मान्तः, सम्यक् आजीवः, सम्यक् व्यायामः, सम्यक् स्मृतिः. किञ्च सम्यक् समाधिः। एतेषां सम्यक् अनुष्ठानेन पुरुषस्य निर्वाणप्राप्तिः भवतीति।

## उपसंहृतिः

एतानि चत्वारि आर्यसत्यानि यथायथतया पाल्यन्ते चेत् पुरुषः निर्वाणं प्राप्स्यति। तेन संसारूपदुःखस्य समूलविनाशो भविष्यति। पुरुषः स्वस्वरूपं प्राप्नोति,. किञ्च परमसुखं परमानन्दञ्च प्राप्नोति। साधनं सम्यक्तया परिपाल्यते चेत् साध्यं स्वत एव सिध्यति। पुरुषैः साध्यं स्थिरीकृत्य साधने एव यत्नः करणीयः। अतो भगवान् बुद्धोऽपि दार्शनिकतत्त्वे आदरं न चकार। तस्य दृष्टिः परमसाधनैवासीत्। तस्य मते दार्शनिकतत्त्वे केवलं विचार एव भवति। तेन नाना गतिः तर्कमूलकविचारा एव सिध्यन्ति न तु परमसाध्यम्। तस्मात् स साक्षात् भिक्षुकान् परमसाध्यस्य कृते परमसाधनमुपदिष्टवान्। बौद्धानाम् एतानि चत्वार्यासत्यानि इतरेषु दर्शनेषु समानतया दृश्यन्ते। दुःखं जिहासार्थमेव अन्येषामपि शास्त्राणां तथा दर्शनानां प्रवृत्तिः। जननमरणजराव्याधिरूपं यत् दुःखं तस्योपशमनं साधनस्य मूललक्ष्यमिति। तदेव भिन्नेषु भिन्नेषु शास्त्रेषु आस्तिकनास्तिकदर्शनेषु प्रतिपाद्यते।

# बौद्धदर्शने निर्वाणविचारः

प्रशान्तवर्मन्

## भूमिका

विकाशश्चाजायत। तेषु बौद्धधर्म एक अन्यतमप्राचीनप्रधानधर्मः। धर्मस्यास्य आदीमप्रवर्तकः गौतमबुद्ध इति। पुरुषोऽयं ख्रीष्टपूर्वषष्ठशताब्द्यामासीत्। धर्मेऽस्मिन् मतवादद्वयं तयोरेको 'हीनयान' इत्येतस्यैव नामान्तरं तावत् स्थविरवाद इति। अपरो मतवादो 'महायान' इति। बैद्धदर्शनस्य प्रधानांशस्तु दुःखस्य कारणनिर्णयस्तस्य निरसनाय मार्गान्वेशनश्चेति। वासना एव सर्वेषां दुःखानां मूलमिति। बैद्धमते सर्वप्रकारबन्धनात् मुक्तिरेव प्रधानलक्ष्यं, तदेव निर्वाण इत्युच्यते। विविधानां सम्प्रदायानां धर्माचार्याः स्वस्वाध्ययनानुभवाधारेण निर्वाणस्य तत्त्वात्मकरहस्योपरि प्रकाशं प्रक्षिप्तवन्तः। मानवजीवनस्य धर्मार्थकाममोक्षाश्चत्वारः पुरुषार्थाः सन्ति। धर्मादिषु चतुर्षु पुरुषार्थेषु अन्तिमो मोक्षात्मकः पुरुषार्थ एव परमपुरुषार्थः। एतदेव सर्वेषां साधकानां चरमलक्ष्यं भवति। अत एव यथार्थदृष्टियुता भिक्षवोऽध्रुवे ध्रुवान्वेषणं कुर्वन्ति।

मोक्षोऽयमेव बौद्धदर्शने निर्वाण इति। मोक्षस्य प्राचीनतमा लाक्षणिकसंज्ञा 'अमृत' इत्येवास्ति। अतो निर्वणस्यामृतस्वरूपत्वात् मोक्षसंज्ञा सुनिश्चिता। कथमिति चेन्निर्वाणश्चेतसो विमुक्तिरस्तीति। वस्तुतस्तु मृत्योरुपरि विजय एव बुद्धस्य बुद्धत्वमासीत्।

## निर्वाणशब्दविचारः

निर्वाणशब्दस्य व्युत्पत्तिरेव विदुषां तोषजनकमिति व्युत्पत्तिश्रवणेनैव ज्ञायते न तावदत्र मानानन्तरमपेक्षते। निरित्युपसर्गपूर्वकं 'वा'-धातोः क्तप्रत्यये सति शब्दोऽयं निष्पन्नः। संस्कृतसाहित्यादिप्रपञ्चे शब्दस्यास्य बहुष्वर्थेषु प्रयोगो दृश्यते। परन्तु बौद्धदर्शनस्यायं पारिभाषिकशब्दः। बौद्धदर्शनानुकूल्या 'निवार्यते दुःखत्रयं येनासौ निर्वाण' इत्येवं व्युत्पत्तिः कर्तव्या। अनया निर्वाणस्वरूपस्तावद्- दैहिकदैविकभौतिकादीनां दुःखानामात्यन्तिकाभाव एव इति। पुनः केचन निर्वाण इत्यत्र बकारवकारयोरभेदं मत्वा किञ्चिद्भिन्नप्रकारेण परन्तु दर्शनानुकूलमर्थमुपस्थापयन्ति। एतैः प्रतिपादितार्थं संक्षेपेनोपस्थापयामश्चेत्- निःशेषम् अखिलः सर्वतोभावेन वार्यते इति वकारग्रहणेन पुनः बकारग्रहणेन तावत् बाणोऽर्थात् पञ्चबाणा इत्यनेन काम इति ग्राह्यः अर्थात् कामः सांसारिकी विविधेच्छा येनासौ निर्वाण इति निष्पद्यते, अर्थाद् यस्योपलब्धौ कामदेवपुरस्सरं सांसारिकसमस्तेच्छानामात्यन्तिकाभावो भवेत्, स एव निर्वाणशब्दस्य वाच्यार्थ इत्येवम्। पालिभाषायां तु शब्दोऽयं 'निब्बान' इति।

निर्वाणविषये पाश्चात्त्यविदुषामपि भिन्नमतानि सन्ति प्राच्यानां तु अस्त्येव। तत्र पाश्चात्त्यदार्शनिकेषु वर्थेलेमी, सेष्टहिलेरी, चाइल्डर्स, रीजडेविड्स तथा पिशलाहीनां मतं तावद्- बुद्धस्तथा तदनुयायिनः 'निर्वाण' इत्यस्य स्वरूपमभावमात्रं स्वीकुर्वन्तीति। परन्तु रीजडेविड्स इदमपि कथयति यद् बुद्धवचनानुसारं निर्वाण इत्यनेन 'श्रामण्य' इत्यप्यस्तीति। प्रायोऽधिकाधिकपाश्चात्त्यदार्शनिकाः स्वीकुर्वन्ति तावद् बौद्धोपासकानां दृष्टौ निर्वाण एकरूपेण स्वर्गोऽस्तीति। तस्मादुभयोः मतानामुल्लेखपुरस्सरमेव निर्वाणस्य विवेचना कर्तव्या। अत एवादौ निर्वाणेऽधिकारिनिर्णयपुरस्सरं विचार आरभ्यते।

## निर्वाणेऽधिकारी

बौद्धभिक्षुकानामेव निर्वाणे अधिकारो न तु गृहस्थानामित्येवं मतमासीद्बौद्धानाम्। तस्मात् तदा सर्वे भिक्षुमार्गं स्वीकुर्वन्ति स्म। एतेन निर्वाणे सर्वेषामधिकारो जातः। अत्र प्रमाणत्वेन बौद्धदर्शनस्य इतिहासे एव लभ्यते यत्स्वयं बुद्ध एव दुराचारिगणिकादस्य्वादिभ्योऽपि प्रव्रज्यादिदीक्षां दत्तवान्। यथा अङ्गुलिमालादिवदतीवभीषणदस्युजनाय दीक्षा प्रदत्ता[1]। पुनः मगधदेशे कुष्ठो, मृगीत्यादिवत्कठिनरोगग्रस्तजनाय अपि दीक्षा प्रदत्ता[2]। एतेन प्रमाणितं यत्पूर्वं निर्वाणे जातिवर्णनिर्विशेषेण सर्वेषामधिकारीत्वमासीदिति। कदाचित् केनचित् जैनिकब्राह्मणेन भगवतो बुद्धस्य जातिविषये प्रश्नः कृतस्तदा स्वयं भगवता बुद्धेनोत्तरितं तावत्-

> "मा जातिं पुच्छ चरणं च पुच्छ
> कट्ठा हवे जायति जातवेदो।
> नीचकुलीनो पि मुनि धितिमा
> आजानीयो होते हिरीनिसेधो॥" [3] इति।

---

[1]उदान-५। ६

[2]विनयपिटक, महावग्ग-१। ३। ४(१)

[3]संयुत्तनि, ब्राह्मणसुंयुत्त, अरहंतवग्ग- ७। १। ९। ९

श्लोकस्यास्य भावार्थस्तावदेवं जातिं मा पृच्छ, आचरणानुसन्धानं कुरु। कारणं काष्ठो भवति चेदेव अग्निरुत्पद्यते। तथैव नीचकुलजो जनोऽपि धीतिमान्, ह्रीनिषेधः, आजानेयमुनिश्चापि भवतीति।

परन्तु भगवाता बुद्धेन एव विषयेऽस्मिन् केचन नियमा उक्ताः। नियमेषूक्तं केषां तावत् निर्वाणेऽधिकारो नास्तीति। तद्यथा अङ्गहीनः, क्षयादिमहाव्याधिग्रस्तः, तस्करः, दस्युः, राजभृत्यः, राजसैन्याः, ऋणी, दासः, हननकारीत्येतादृशानां जनानां न तावन्निर्वाणे अधिकार[4] इति।

स्त्रीणामपि मोक्षे अधिकारोऽस्तीति स्वयमेव भगवता कृष्णेन गदितं गीतायां यथा-

"मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्॥" [5] इति।

यद्यप्येवं बौद्धधर्मे पूर्वं स्त्रीणां निर्वाणलाभेऽधिकारो नासीत् परन्तु स्वयं बुद्धैरेव परं स्त्रीणामपि निर्वाणेऽधिकारीत्वं स्वीकृतमित्येतादृशविषयाः वियनयपिटकादिग्रन्थेष्वालोचिताः[6]।

## पाश्चात्त्यविदुषां मतानि

निर्वाणः केवलमभावमात्रमेव नान्यत्किमपीति यूरोपीय-विद्वान् 'वर्नूफ' इत्यस्य कालतः पुनः पुन एतदेव मतं प्रकटितम्। सन्दर्भेऽस्मिन् 'पूसे' इत्यनेन विदुषा गदितं यन्निर्वाणो न भावात्मकं न चाभावात्मकमिति। वस्तुतो निर्वाणः अनिर्वचनीयोऽस्तीति।

'रीजडेविड्स' इत्यस्याभिप्रायानुसारं बुद्धस्य आदर्श आध्यात्मिकमासीत्। तस्मात् निर्वाणस्यार्थोऽस्मिन् लोके प्रज्ञया तथा सम्यक् शान्त्या मोक्षोपलब्धिरासीत्। परन्तु तस्यानुयायिनस्तस्य तद्विचारान् अबुद्धा अमृतानन्तादिव्याख्याः कृतवन्त इति।

'सेनार्त' इत्यस्यानुसारं निर्वाणशब्दस्यार्थो भारतवर्षे सदैव परमं क्षेमं तथा मोक्ष एवावबुध्यते, यश्च अभावसंज्ञातो दूरवर्ती वर्तते। एतन्मते बौद्धधर्मस्योद्गमस्थानं योगः स्वीकृतमस्ति, यतो हि योगी सततं मोक्षार्थं प्रयत्नवान् भवतीति।

प्रसङ्गेऽस्मिन् 'वर्थ' इत्यास्य मतं तावद् ये निर्वाणमभावमात्रं नाङ्गीकुर्वन्ति तैस्तद्धर्मस्य संज्ञा विवेचनीया। बौद्धानुसारं निर्वाण इत्यस्य लक्षणरूपेण शाश्वततत्त्वमिति वर्तते। परन्त्वत्रायं प्रश्नोऽपि समुदेति, किं शाश्वतधर्मो निर्वाणो नास्ति? यच्च पालिभाषायाम् 'अमता'-धातुः इत्युदीरितोऽस्ति। वस्तुतोऽध्ययनेन कति पयवचनैः सुस्पष्टमस्ति यद् बुद्धस्य विचारे निर्वाणः परमार्थ इति।

केषाञ्चिद् विदुषां मते बौद्धधर्मस्य स्वरूपद्वयमस्ति। तद्वयं तावदुपासकानां धर्म इत्येकमपरञ्च भिक्षूनां धर्म इति। अध एतौ संक्षेपेन उपस्थाप्येते।

## उपासकानां धर्मः

स्वर्गप्राप्त्यर्थमुपासकानामुपासना परन्तु भिक्षवस्तु निर्वाणमार्गस्य 'पथिका' इति। उपासकाः न केवलं स्तूप-चैत्यादीनामेव उपासनां कुर्वन्ति अपि तु बौद्धतीर्थयात्रां, पञ्चशीलस्य समादानं, पापविरतिम्, उपवासव्रतादिकं, दानं, धर्मश्रवणं, शीलरक्षणं, दानादिद्वारा पुण्यार्जनमित्यादिकमपि सम्पादयतीत्येवमादिभिः ते अभ्युदयं लभन्ते। यद्यप्येतत् सत्यमस्ति यत् सर्वे बौद्धाः सर्वदैव निर्वाणं प्रति आशान्विताः परन्तु निर्वाणमार्गे भिक्षूनामेव साक्षात् प्रवेशाधिकारो न तु उपासकानाम्। तथाप्युपासकानां परम्परया निर्वाणमार्गे प्रवेशाधिकारस्तु अस्त्येव। कारणमभिधर्मकोशानुसारम्[7] उपासकः 'अर्हन्' इति भवितुं शक्नोति। यस्मिन् क्षणे स 'अर्हन्' इति भवति तदैव स भिक्षुर्भवति तदानीं सङ्घे प्रविशतीत्येवं क्रमेण निर्वाणमार्गेऽपि प्रवेशाधिकार इति। परन्तु केषाञ्चिद् विदुषां मतानुसारमनागामिफलं प्राप्तुं शक्नोत्युपासको न तु कस्यामप्यवस्थायामर्हत्वं लभते। केवलं भिक्षुरेव 'अर्हन्' इति भवितुं शक्नोति, एवं भिक्षवे एव निर्वाणमार्गोऽस्ति।

## भिक्षूनां धर्मः

भगवता बुद्धेन भिक्षूनां कृते सप्तत्रिंशद्धर्मा उपदिष्टाः। ते यथा- स्मृतिप्रस्थानचतुष्टयं, सम्यक्प्रधानचतुष्टयम्, ऋद्धिपादचतुष्टयम्, इन्द्रियपञ्चकं, बलपञ्चकं, सप्त बोध्यङ्गानि, अष्टौ अष्टाङ्गिकमार्गाश्चेत्येवं सप्तत्रिंशद्धर्माः। बुद्धेन उक्तं तावदेते धर्माः भिक्षुभिः समग्ररूपेण संमोदमानपूर्वकमविवदमानपूर्वकञ्च शिक्षनीया इति। भिक्षूनां कृते एते सप्तत्रिंशद्धर्माः बुद्धेन उक्तमासीदित्यत्र मानं तावद्भावविवेकस्य 'करतलरत्ने' सूत्रमेकं कृतं यथा- "सप्तत्रिंशद्बोधिपाक्षिकधर्माणां यथा बुद्धोपदिष्टं यथावत् संदर्शनं धर्म इत्युच्यते।" [8] इति।

स्मृतिप्रस्थानचतुष्टयं तावत्- १.काये कायानुस्पर्शिविहारः, २.वेदनासमूहे वेदनानुस्पर्शिविहारः, ३.चित्ते चित्तानुस्पर्शिविहारः, ४.धर्मे धर्मानुस्पर्शिविहार इति।

---

[4] विनयपिटक, महावग्ग- १।३।४, १।४।५

[5] श्रीमद्भगवद्गीता- ९।३२

[6] विनयपिटक, चुल्लवग्ग- १०।१।१, १०।१।३; अङ्गुत्तरणि- ८।५१।१-२

[7] अभिधर्मकोशः- ४।४९

[8] भावविवेकस्य 'करतलरत्ने'।

सम्यक्प्रधानचतुष्टयं तावत्- १.अनुत्पन्नाकुशलधर्मसमूहस्यानुत्पादनप्रचेष्टा, २.उत्पन्नाकुशलधर्मसमूहस्य प्रहानप्रचेष्टा, ३.अनुत्पन्नकुशलधर्मसमूहस्य समुत्पादनप्रचेष्टा, ४.उत्पन्नकुशलधर्मसमूहस्य संरक्षणसंवृद्धिप्रचेष्टा इति।

अत्र स्मर्तव्यं यत् केषाञ्चित् मते स्मृतिप्रस्थानचतुष्टयस्य सम्यक्प्रधानचतुष्टयस्य च अष्टाङ्गिकमार्गे एवान्तर्भाव इति।

ऋद्धिपादचतुष्टयं तावत्- १.छन्दसमाधिप्रधानसंस्कारयुक्त ऋद्धिपादः, २.वीर्यसमाधिप्रधानसंस्कारयुक्त ऋद्धिपादः, ३.चित्तसमाधिप्रधानसंस्कारयुक्त ऋद्धिपादः, ४.विमर्शसमाधिप्रधानसंस्कारयुक्त ऋद्धिपाद इति

पञ्च इन्द्रियानि- १.श्रद्धा, २.वीर्यं, ३.स्मृतिः, ४.समाधिः, ५.प्रज्ञा इत्येतानि।

बलपञ्चकं- १.श्रद्धाबलं, २.वीर्यबलं, ३.स्मृतिबलं, ४.समाधिबलं, ५.प्रज्ञाबलमिति।

सप्त बोध्यङ्गानि- १.स्मृतिसम्बोध्यङ्गं, २.धर्मविचयसम्बोध्यङ्गं, ३.वीर्यसम्बोध्यङ्गं, ४.प्रीतिसम्बोध्यङ्गं, ५.प्रश्रब्धिसम्बोध्यङ्गं, ६.समाधिसम्बोध्यङ्गम्, ७.उपेक्षासम्बोध्यङ्गमिति।

अष्टौ अष्टाङ्गिकमार्गास्तावत्- १.सम्यग्वचनं, २.सम्यक्कायकर्म, ३.सम्यगाजीवः, ४.सम्यग्दृष्टिः, ५.सम्यक्संकल्पः, ६.सम्यक्प्रचेष्टा, ७.सम्यक्स्मृतिः,८.सम्यक्समाधिः इत्येवं भिक्षूनां धर्माः। वक्तुं शक्यते यत् महाभारतेऽपि अष्टाङ्गिकमार्गस्योल्लेखो दृश्यते इति। तत्र शौनकेन उपदिष्टो यद्विशुद्धचित्तः सन् अष्टाङ्गिकमार्गसमाचरणे सति देवयानपथा गतिर्भवतीति[9]। बौद्धानामेतदष्टाङ्गिकमार्गाचरणं त्रिशरणमन्त्रग्रहणपूर्वकमेव भवति। मन्त्रत्रयं तावत्- 'बुद्धं शरणं गच्छामि', 'धम्मं शरणं गच्छामि', 'सङ्घं शरणं गच्छामि' इति।

## निर्वाणस्वरूपम्

आर्यमार्गस्य चर्यैव निर्वाणस्य चर्यास्ति। सङ्घभद्रानुसारं निर्वाणस्य विचारविमर्शे विचिकित्सोत्पादः कदापि न कर्तव्यः। वस्तुतो निर्वाणलाभाय एव श्रमणाः संसारं परित्यजन्ति सङ्घे च प्रविशन्ति। निर्वाणः स्वर्गस्य विपर्यय इवास्तीत्येवं केचन कथयन्ति। परन्तु जीवस्य यच्च दीर्घकालिकं संसरणमस्ति तत्र स्वर्गमेकं स्थानं भवति, निर्वाणस्तु संसारस्यान्त इत्युच्यते। स्वर्गः पुण्यस्य विपाकमात्रमस्ति। परन्तु निर्वाणः पापपूण्ययोर्दूरे वर्तते। निर्वाणस्य एकमात्रं लक्ष्यमस्ति क्लेशरागयोर्विनाशः। निर्वाणस्य प्राप्तिः प्रतिजनैः स्वयमेव करणीया। तर्हि कस्तावत् निर्वाण इत्यस्मिन् प्रश्ने कथनमिदं निःसन्दिग्धं यत्- अयं हि परमः क्षेमः, दुःखस्य संसारस्य चान्तोऽस्ति, जन्मजरामरणोपरि परमो विजय इति।

विदुषामत्र विचारवैभिन्न्यमस्ति। केचन निर्वाणमभावमात्रम्, अन्येऽमृतमिति स्वीकुर्वन्ति। केषाञ्चिन्मते निर्वाणस्यानुसन्धानमनावश्यकमस्ति। अन्ये तु इमममृतपदं वदन्ति तथा च सर्वरागदुःखपुनर्जन्मादीनां च निरोधमात्रमिति।

बुद्धमतानुसारं निर्वाणो नाम दुःखाभावः, निरुपाधिकसुखम्, अमृतस्वरूपः, अपुनर्भवश्चेति। एतस्य भिन्नं वर्णनमपि लभ्यते। 'पटिसम्भिदामग्ग' इत्यत्रापि निर्वाणस्वरूप उक्तः। तत्रोक्तस्य भावार्थस्तावदेवं यत् सम्यक्त्वनियामकेऽवक्रमणपूर्वकमेव निर्वाणलाभो भवति। पुन आनुलोमिकक्षान्तिसमन्वागतपूर्वकमेव सम्यक्त्वनियामकेऽवक्रमणं सम्भवतीति। पञ्चस्कन्धके अनित्यं , दुःखं, रोग इत्यदीनामनित्यत्वदर्शनपूर्वकमेव आनुलोमिकक्षान्तिलाभो नान्यथा। पञ्चस्कन्धकस्य निरोधे सति निर्वाणः परन्तु तस्य विविधरूपत्वात् निर्वाणस्वरूपमपि भिन्नं भिन्नं भवति। पञ्चस्कन्धकस्यानित्यत्वदर्शनपूर्वकं तस्य निरोधे सति निर्वाणस्य नित्यत्वं ज्ञायते। यथा पञ्चस्कन्धके दुःखस्यानित्यत्वं तस्य निरोधे सति सुखस्वरूपो निर्वाणो नित्यो भवतीति। इत्येवं पञ्चस्कन्धकान्तर्गतानां केषाञ्चिदनित्यत्वं तेषाञ्च निरोधपूर्वकं नित्यनिर्वाणस्वरूपमधस्तालिकामाध्यमेन प्रदर्श्यते।

| पञ्चस्कन्धकेऽनित्यत्वम् | निर्वाणस्वरूपम् |
|---|---|
| रोगः | आरोग्यम् |
| अघः | अनघः |
| चलः | अचलः |
| अध्रुवम् | ध्रुवम् |
| शून्यम् | परमशून्यम् |
| अनात्मा | परमार्थः |
| असारः | सारः |
| मरणधर्मा | मृतम् |

क्षयात्मक एव निर्वाणस्य मुख्यतम आकार इति। निर्वाणस्याप्रादुर्भावत्वमस्य स्वयं प्रकाशत्वात्। वस्तुतो निरोध एव निर्वाणोऽस्ति। कथमिति चेत् तृष्णाक्षयदुःखानां निरोधे सति निर्वाणो भवतीत्येतस्मात्। अयं हि निरोधो विसंयोगो मन्यते। 'स्थविरा सुमेधा' इत्यनेनोक्तं 'कामसुजरा', 'सर्वत्रसर्वजातिसमूहमरणव्याधिगृहीत' इति। परन्तु निर्वाणोऽजर इति। यथोक्तं 'थेरीगाथा'

[9] महाभारते-३। २। ८१-२

इत्यत्र-

इदमजरमिदममरं इदमजरामरणपदमसोकम्।
असपत्तमसंबाधम् अखलितमभयं निरुपतापम्॥ इति।

## निर्वाणस्य भेदाः

निर्वाणस्य भेदद्वयमिति भगवता बुद्धेन स्वयमेव उपदिष्टम्। भेदद्वयं तावत्- सोपधिशेषनिर्वाण इत्यादिममपरमन्तिमञ्च अनुपधिशेष इति।

१.सोपधिशेषनिर्वाणः- पञ्चस्कन्धस्य विद्यमानपूर्वकं सर्वविधतृष्णायाः निवृत्त्यनन्तरं स्थितभावेन अवतिष्ठति चेत्स सोपधिशेषनिर्वाण इति। एतस्य पुनो नामान्तराणि सन्ति। तानि तावत्- दृष्टधार्मिकनिर्वाणः, क्लेशनिर्वाणः, संयोजनक्षयान्तनिर्वाण इत्यादीनि।

अत्र दृष्टन्तत्वेन वक्तुं शक्यते तावद् गौतमबुद्धस्य यदा सकलतृष्णानिवृत्तिपूर्वकं सम्बोधौ उद्भासो जातस्तदा स निर्वाणस्तस्य सोपधिशेषनिर्वाण आसीदिति।

२.अनुपधिशेषनिर्वाणः- सोपधिशेषनिर्वाणानन्तरं यदा पञ्चस्कन्धस्य निवृत्तिर्भवति तदानुपधिशेषनिर्वाण उच्यते। एतस्यापि नामान्तराणि सन्ति। तानि यथा- निरुपादिशेषनिर्वाणः, साम्परायिकनिर्वाणः, स्कन्धनिर्वाणः, जातिक्षयान्तनिर्वाण इति।

अत्र दृष्टान्तस्तावत्- कुशीनगरे यदा भागवान् बुद्धः स्वपूर्वसूचनानुसारेण जगत्संसारत्यागपूर्वकं महापरिनिर्वाणलाभेन नामरूपादीनामपि सक्रियतया निरवसानं कृतवान् आसीत्। स भवति अनुपधिशेषनिर्वाण इति।

## उपसंहारः

सर्वेक्षणेन प्रतीयते यन्निर्वाणवादोऽपि योगादेव गृहीतोऽस्तीति। एतत्तु सत्यं यत् कामनाः परस्परं भिन्ना भिन्ना एव जायन्ते। केचित् स्वर्गे अप्सरसो लाभाय, अन्ये अलौकिकसिद्धये, परन्तु यथार्थदर्शी तु अमृतस्वरूपलाभाय एव प्रयतते।

सर्वास्तिवादे वैभाषिकनये च आकाशनिर्वाणौ धर्मावास्ताम्। सौत्रान्तिकैर्निर्वाणस्य धर्मत्वं नाङ्गीकृतम्। एवमेव माध्यमिकैरपि धर्मो नाभिमन्यते। कारणं हि तेषां नये निर्वाणविषये उक्तमस्ति यत्- 'अनपेक्षः स्वभावः' इति। वैभाषिकमते सौत्रान्तिकमते च उभयत्रापि कल्पितं तावन्निर्वाणात् पूर्वं किमपि वस्तु सद्रूपेणासीत् यत् पश्चान्निरुद्धं भवति। अतो निर्वाणः केवलं शून्यमेव नास्ति, अपि तु संस्कृतमपि वर्तते इति।

माध्यमिकानां मते हेतुप्रत्ययादीनामाश्रयमादाय जन्ममरणादिव्यवस्था कृता वर्तते। यदा तत्र हेतुप्रत्ययादीनामुपेक्षा जायते तदा निर्वाणो व्यवस्थाप्यते। अर्थात् माध्यमिकानामनुसारं निर्वाणसंसारयोर्नास्ति भेद इति। केवलं हीनयाने एव निर्वाणस्याचैतन्यत्वं न स्वीकृतम्। एवं सर्वैरपि स्वस्वानुभवानुसारं निर्वाणं निरूपितवन्तः। परन्तु 'अन्धाभिजने हस्तिप्रवेशः' इतिवद्येनाचार्यैःयदंशोऽनुभूतस्तेन तथा निर्वाणः प्रपञ्चितः। अत एव निर्वाणोऽयमनिर्वचनीयस्वरूप इति।

## ग्रन्थसूची

१. श्रीमन्माधवाचार्यः, २००६, सर्वदर्शनसंग्रहः, शर्मा उमाशङ्कर(भाष्यकारः), वाराणसी, चौखम्बा विद्याभवन।
२. सिन्हा हरेन्द्र प्रसाद, १९९३, भारतीय दर्शन की रूपरेखा, दिल्ली, मोतीलाल बनारसीदास।
३. विद्यारण्य स्वामी, १९९९, बौद्ध दर्शन ओ धर्म, कलकाता, पश्चिमवङ्ग राज्य पुस्तकपर्षत्।
४. डा. राधाकृष्णन, २०१२, भारतीय दर्शन-१, गोभिल नन्दकिशोर(हिन्दी अनुवादक), दिल्ली-६, राजपाल।
५. शेरबात्स्की एफ. टी., २०२५(सं.), बौद्ध-न्याय, राय रामकुमार(हिन्दी अनुवादक), वाराणसी, चौखम्बा विद्याभवन।

# बौद्धदर्शनस्य सम्प्रदायाः तन्मतानि च

सुदीप-मण्डलः

## १. भूमिका

दृश्यते साक्षात्क्रियते आत्मतत्त्वमनेन इति दर्शनम्। यद्यपि स्वभाववादी यदृच्छवादी[10] इत्यादीनि भिन्नानि मतानि दर्शनभेदविषये सन्ति, तथापि प्राधान्येन आस्तिकनास्तिकभेदेन भारतीयदर्शनानि द्विधा विभज्यन्ते इति बोध्यम्। वेदस्य प्रामाण्यं येन स्वीक्रियते तदास्तिकदर्शनम्। तत्र षडास्तिकदर्शनानि तावत् सांख्यदर्शनं योगदर्शनं न्यायदर्शनं वैशेषिकदर्शनं पूर्वमीमांसादर्शनम् उत्तरमीमांसादर्शनं चेति। येन च वेदस्य प्रामाण्यं न स्वीक्रियते तत् नास्तिकदर्शनम्। यथा चार्वाकदर्शनं जैनदर्शनं बौद्धदर्शनञ्चेति। यद्यपि भारतीयदर्शनेषु बौद्धदर्शनं नास्तिकत्वेन स्वीकृतं तथापि बौद्धदर्शनं न सर्वत्र वेदेन सह विरूध्यते। सन्ति च केचन विषयाः यत्र वेदेन साकं बौद्धदर्शनस्य विरोधः नास्ति। यथा भगवतः बुद्धस्य कर्मकाण्डविरूद्धं निर्वाणतत्त्वम्, मोक्षसाधने वैदिककर्मकाण्डमपरिहार्यं नास्तीति उपनिषद्भिः प्रतिपादितेन तत्त्वेन सह मिलति। पुनश्च परिवर्तनशीलम् अनित्यं वस्तु दुःखयुक्तं, दुःखं सत्यमिति उपनिषद्भिः प्रतिपादितेन तत्त्वेन सह बुद्धमतं मिलति। अतः दुखस्वरूपनिर्णये दुःखनिवृत्तेः उपायान्वेषणे च बुद्धेन तपः कृतमिति। एवं वेदाविरोधित्वेऽपि केचनविषयाः सन्ति यत्र बौद्धमतं वेदेन सह न मिलति। यथा उपनिषदि ज्ञानमयं नित्यमानन्दस्वरूपम् आत्मानं परमार्थसत् इत्युक्तम्, परन्तु बुद्धमतानुसारेण अनित्यं दुःखमयं वस्तु परमार्थसत् इत्युक्तम्। तत्र अविद्यया अनित्यं दुःखमयं वस्तु नित्यत्वेन आनन्दमयत्वेन प्रतीयते। पुनश्च उपनिषदि परमार्थसत् वस्तु अवेद्यं अपरोक्षानुभवस्वरूपमित्युक्तम्, परन्तु बुद्धमतेन प्रामाणावेद्यम् असत्। उपनिषदि अविद्या नाम परमार्थसतः आत्मस्वरूपस्याज्ञानम्, परन्तु बुद्धमतेन आर्यसत्यचतुष्टयस्य प्रतीतसमुत्पादस्य चाज्ञानम् अविद्या इति। अतः वेदविरूद्धत्वात् बौद्धदर्शनं नास्तिकदर्शनमिति चोच्यते। एतत् दर्शनं भगवतः बुद्धस्य वचनमाश्रित्य प्रवर्तितम्। अतः देवस्य बुद्धस्य कालादयः ज्ञातव्याः। तेन दर्शनस्य कालादयोऽपि निश्चिताः स्युः। वस्तुतः अस्य दर्शनस्य सम्प्रदायाः एव मुख्यविषयत्वेन मया स्वीकृताः सन्ति। तेषां विवरणं तद्वैशिष्ट्यानि च परं प्रदीयन्ते।

## २. बुद्धस्य जीवनवृत्तान्तः

प्रायः ५६३ ईशापूर्ववर्षे हिमालयस्य पादपद्मे कपिलावस्तु- नामकराजधान्याः लुम्बिन्यां शाक्यवंशे क्षत्रियकूले गौतमबुद्धः जातः आसीत्। तस्य पिता शुद्धोदनः, माता च माया आसीत्। गौतमस्य जन्मनः सप्तमे दिनाङ्के तस्य माता दिवं गता आसीत्। श्रुयते यत् प्रायः ५४७ ईशापूर्ववर्षे सम्बन्धिन्या भगिन्या यशोधरया साकं विवाहं कृतवान् आसीत्। तदा तस्य वयः आसीत् षोडशवर्षाणि। तस्य राहुलनामकः एकः पुत्र आसीत्, य अनन्तरं तस्यैव शिष्यः सञ्जातः। ततः दशवर्षानन्तरं ऊनत्रिंशत् वर्षे तन्नाम प्रायः ५३४ ईशापूर्ववर्षे सन्यासं स्वीकृत्य गृहं त्यक्तवान्। एकदा स कपिलावस्तुनगर्याः मार्गे दृश्यचतुष्टयं दृष्टवान् आसीत्। ते यथा–

१) एकः वृद्धः यः वयोकारणात् दुर्बलः क्षीणः वक्रश्च सञ्जातः।
२) एकः रुग्नः यः कुष्ठरोगेण आक्रान्तः सन् पीडया कष्टमनुभवति स्म।
३) एकः शवः यस्य पश्चात् आत्मीयाः शोकवशात् रुदन्ति स्म।
४) एकः संसारबन्धनात् मुक्तः जटाधारी सन्न्यासी यः मोक्षकामी आसीत्।

ततः तस्य दुःखरूपस्य जगतः ज्ञानेन वैराग्यमुत्पन्नम् आसीत्। अतः दुःखनिवृत्तेः उपायान्वेषणार्थं गृहं त्यात्त्वा सन्न्यासं स्वीकृत्य च अध्ययनेन तदानींतनतत्त्वानि आचारविधयान् च ज्ञातवान्। तथापि दुःखनिवृत्तेः उपायं न लब्धवान्। अतः मध्यपन्थामाश्रित्य तपसा बोधिं[11] लब्धवान्। तदा तस्य बुद्धः इति नाम सञ्जातम्। ततः ज्ञानालोके तस्य मनसि सत्यचतुष्टयं प्रकाशितम्। ते यथा - दुःखम्, समुदयः, निरोधः, मार्गश्चेति। एतत् सत्यचतुष्टयम् आर्यसत्यमित्युच्यते। आर्यसत्यज्ञानेन तदनुगुणाचारेण वा दुःखात् निवृत्तिः भवेत् इति बुद्धमतम्। ततः ज्ञानलाभानन्तरं लोककार्यार्थं बहून् मठान् प्रतिष्ठाप्य आर्यसत्यं प्रचारितवान्। तस्य वाणीमाश्रित्य धर्मः दर्शनमेकं वा प्रवर्तितम्।

## ३. बौद्धसम्प्रदायाः

बुद्धवाणीम् आश्रित्य बौद्धदर्शनस्योद्भवः जातः। तत्र कालिकप्रवाहेन बौद्धाः प्राचीननव्यभेदेन द्विधा विभज्यते। यद्यपि ते बुद्धवाणीम् अधिकृत्य एव प्रवर्तते, तथापि तेषु केषुचित् स्थलेषु मतपार्थक्यं दृश्यते। अतः एव सम्प्रदायभेदाः सम्पन्नाः। तेषां

[10] कालः स्वभावो नियतिर्यदृच्छाभुतानि योनिः पुरुष इति चिन्त्यम्। श्वेताश्वतरोपनिषद्।
[11] सत्यं ज्ञानम्।

सम्प्रदायानां विवरणमधः आलोच्यते।

## ३.१. प्राचीनबौद्धदर्शनम्

बुद्धसमकालिके बुद्धवाणीषु मतभेदात् पूर्वं तद्वाणीमाश्रित्य यद् दर्शनं प्रवर्तितम्, तत् प्राचीनबौद्धदर्शनम्। वस्तुतः बुद्धेनोक्तं दर्शनं प्राचीनबौद्धदर्शनमित्यर्थः। भगवता बुद्धेन तपसा यत् आर्यसत्यचतुष्टयम् उपलब्धवान् तत्र तत्कालिकभेषजविद्यायाः प्रभावः दृश्यते। यथा भेषजशास्त्रे पीडा, पीडायाः कारणम्, आरोग्यम्, आरोग्योपायः इति चत्वारः विषयाः आलोच्यन्ते। तथैव बौद्धदर्शनस्य आर्यसत्यचतुष्टयमपि चतुर्भिः विषयैः सम्पन्नम्। तथाहि दुःखम्, समुदयः अर्थात् दुःखस्य कारणम्, दुःखस्य निरोधः, दुःखनिरोधस्य मार्गाः चेति। बुद्धवाण्यनुसारिणः प्राचीनबौद्धदार्शनिकानां मते लोके देवतामनुष्यपिशाचादिभिः जरामरणव्याध्यादीनि दुःखानि अनुभूयन्ते, तेषां दुःखानां कारणं जन्मजीवनादि। निरन्तरं नैतिकप्रयासेन दुःखनिवृत्तिः, तादृशप्रयासः निर्वाणोपायः इति। बुद्धवाणीतः प्रतीत्यसमुत्पादतत्त्वं निसृतमिति प्राचीनाः बौद्धदार्शनिकाः चिन्तयन्ति। कार्यकारणतत्त्वमेव प्रतीत्यसमुत्पादः धर्मः वा। सर्वाणि वस्तूनि प्रतीत्यसमुत्पन्नानि भवन्ति। जीवजन्मनः या कार्यकारणश्रृङ्खला, तस्याः आद्यकारणम् अविद्या एव। नैतिकप्रयासलब्धेन ज्ञानेन अविद्यायाः नाशः भवति। तत्र अर्थक्रियाकारिवस्तु एव सत्। अर्थक्रियाकारित्वात् सत्वस्तुमात्रं क्षणिकमिति।

### ३.१.१. प्रतीत्यसमुत्पादतत्त्वम्

प्रतीत्यसमुत्पादः नाम कार्यकारणतत्त्वमिति। बौद्धमते कार्यकारणभावस्य यः सिद्धान्तः प्रतिपादितः स प्रतीत्यसमुत्पादः इत्यर्थः। दुःखयुक्तस्य जीवनस्य उत्पत्तिः विनाशश्च अनेन कार्यकारणसिद्धान्तेन एव भवति। कार्यकारणभावस्तावत् प्रतिपाद्यते। तत्र अविद्यात् संस्कारः, संस्कारात् चैतन्यम्, चेतन्यात् नामरूपम्, नामरूपात् षडायतनम् तन्नाम चक्षुरादीनि इन्द्रियानि, षडायतनात् स्पर्शः अर्थात् इन्द्रियविषययोः संयोगः, स्पर्शात् संवेदनम्, संवेदनात् तृष्णा, तृष्णातः उपादानम्, उपादानात् भवः अर्थात् सत्ता, सत्तातः जन्म, जन्मनः जरामरणं तन्नाम दुःखं चेति उत्पद्यन्ते। अत्र परं प्रति पूर्वं कारणं भवति। पूर्वं प्रति परं कार्यं भवति। एवं च कार्यकारणतत्त्वेन दुःखस्य कारणम् अविद्या इति ज्ञायते। ततः ज्ञानेन अविद्यायाः नाशात् दुःखस्यापि नाशः भवति।

## ३.२. नव्यबौद्धदर्शनम्

रूचिगोत्रबुद्धिभेदेन प्राचीनबौद्धमतस्य अघोषितान्तर्लीनतात्पर्यविश्लेषणेन भिन्नदर्शनस्य नव्यबौद्धदर्शनस्योद्भवः जातः। तत्र प्रमाणप्रमेयकाण्डमेव दर्शनभेदस्य कारणम्। तत्रत्याः नव्यबौद्धाः वैभाषिकः सौत्रान्तिकः माध्यमिकः योगाचारः इति चतुर्षु सम्प्रदायेषु विभक्ताः सन्ति। वैभाषिकसौत्रान्तिकौ हीनयानबौद्धौ, माध्यमिकयोगाचारौ महायानबौद्धौ च भवतः। हीनयानबौद्धाः बहुसत्तावादिनः वस्तुतान्तिकाः भवन्ति, महायानबौद्धास्तु भाववादिनः भवन्ति। एतेषु सम्प्रदायेषु क्वचित् समानमतं, क्वचिच्च मतपार्थक्यं दृश्यते। तेषां विवरणमधः प्रतिपाद्यते।

### ३.२.१. वैभाषिकः

“अभिधर्मज्ञानप्रस्थानम्” इति ग्रन्थमाश्रित्य यः भाष्यग्रन्थः “विभाषा अभिधर्ममहाविभाषा वा” इति समुत्पन्नः, तं भाष्यग्रन्थमाश्रित्य यत् दर्शनं जातम्, तत् वैभाषिकदर्शनम्। वैभाषिकाः वस्तुतान्त्रिकाः भवन्ति। एते वस्तुनः ज्ञानं निरपेक्षं, ज्ञानातिरिक्तसत्तां च स्वीकरोति। एतेषां मते सर्वं वस्तुजातं त्रिकाले समरूपेण सत् भवति। अतः एव सर्वास्तिवादी [सर्व-(दा) अस्तिवादी] इति नाम्नापि अभिधीयते। एतत्सिद्धान्तसमर्थने तैः प्रमाणं दीयते। यथा - “कदाचित् एकः राजा आसीत्” “त्वमुन्नतस्थानं प्राप्स्यति” इत्यादिशब्दव्यवहारः। व्यवहारः हि वस्तुनः त्रिकालस्थायित्वं प्रतिपादयति। कारणं तावत् - व्यवहारः ज्ञाननिर्भरः भवति, ज्ञानं च विषयस्य प्रमाणम्। ज्ञानजनके द्विविधं कारणम्, यथा इन्द्रियं रूपं च चाक्षुषविज्ञानस्य जनके भवतः। शुद्धकार्यं मन्दकार्यं चोभयं फलमुत्पादयति। कर्मणः फलोत्पादकतायाः उत्पादने वस्तुनः त्रिकालसत्ता स्वीक्रियते। यतो हि अतीतकालीनं कर्म अपि सत् इति कारणात् फलमुत्पादयति। असतः वस्तुनः फलं नोत्पादयन्ति। अतीतकालीनस्य कर्मणः फलानुत्पादने बुद्धस्य आर्यसत्यचतुष्टयं प्रतीत्यसमुत्पादतत्त्वं च अर्थहीनं मन्यते।

एतेषां मते वस्तु त्रिकालसदपि स्थिरसत् न भवति। एते तु क्षणिकतावादी भवति। धर्मः सद्वस्तुनः श्रेष्ठोपादानम् अर्थात् क्षुद्रोपादानं नास्तीत्यर्थः। अवयविरूपेण प्रतीयमानं यत्किमपि वस्तु क्षणिकधर्मसमूहः स्कन्दः इत्यर्थः। धर्मस्कन्दः इन्द्रियग्राह्यः भवति। धर्मस्कन्दातिरिक्तं वस्तु असत् भवति। भिन्नानां विज्ञानानां स्कन्दः आत्मा, विज्ञानस्कन्दातिरिक्तः आत्मा असत् इत्यर्थः। पुनश्च एते बाह्यवस्तुनाम् अनुमेयत्वम् अस्वीकृत्य प्रत्यक्षगम्यं स्वीकरोति। यतो हि यावत् तस्य प्रत्यक्षं न भवति, तावत् तस्य वस्तुनः सत्ता भिन्नेन साधनेन न सिद्धति। यथा अग्निप्रत्यक्षं यस्य पुरुषस्य न भवति, स धूमं दृष्ट्वा अनुमानेन कदापि अग्निं साधयितुं न शक्नोति। बाह्यवस्तुना साकं सम्बन्धं विना मनोजगति बाह्यवस्तुनां ज्ञानं नैव स्यात्। अतः विज्ञानवादः स्वीकरणीयः उत बाह्यवस्तुनां प्रत्यक्षं वा स्वीकरणीयम्।

एतै उच्यते संसारः दुःखस्वरूपः। अविद्या च संसारं जनयति। अविद्यायाः फलं तावत् - रागः द्वेषः लोभः क्लेशः चेति। यस्य कस्यापि आन्तरबाह्यस्थिरसद्वस्तुनः धारणा भ्रान्तयुक्ता। अविद्यायाः कारणात् मनुष्यः क्षणिकवस्तु स्थिरसद्वस्तुत्वेन गृह्णाति, तस्मिन् आसक्तश्च भवति। क्षणिकं वस्तु स्थिरत्वेन ग्रहणात् सर्वं दुःखयुक्तं भवति। निर्वाणकामी मनुष्यः प्रतीत्यसमुत्पादनियमं सम्यक्तया उपलब्धिपूर्वकं दुःखनिरोधमार्गं[12] विचारयति। ततः भिन्नभिन्नजागतिकशक्तिविनाशेन निर्वाणलाभः[13] भवति। तेन दुःखस्य विनाशः भवति।

## ३.२.२.सौत्रान्तिकः

सम्प्रदायोऽयं त्रिपिटकसूत्रैः सह सम्बन्धात् सौत्रान्तिकः इति नाम्ना आहूयते। एषः सम्प्रदायः हीनयानसम्प्रदाये अन्तर्भवति। अतः एते वस्तुसत्तावादिनः भवति। एते वस्तुनः ज्ञानं निरपेक्षं, ज्ञानातिरिक्तसत्तां च स्वीकरोति। एतेषां मते सर्वं वस्तुजातं वर्तमानकाले एव सत् भवति। अतः एव वैभाषिकानां सर्वास्तिवादिनां त्रिकालसद्वादीनां खण्डनाय दृढचित्तकः सौत्रान्तिकसम्प्रदायः अस्ति। एतेषां मते - यद्यपि बाह्यपदार्थज्ञानमनुमानेन भवति, तथापि बाह्यमानसिकौ पदार्थौ सत्। बाह्यवस्तुनां प्रत्यक्षे विषयः, चित्तं, इन्द्रियाणि, सहायकतत्त्वानि चेति चतुष्टयस्य अपेक्षा भवति। एतेषां परस्परं संमेलने मनसि उत्पन्नस्य वस्तुनः विचारः (अनुकृतिः) भवति। एवं बाह्यवस्तु मनसि उत्पन्नस्य विषयस्य प्रतिनिधिस्वरूपं भवति। मानसिकधारणात् मनः बाह्यपदार्थानाम् अनुमानं करोति। एतेषां मते किमपि संस्कृतं वस्तु, सत् वस्तु क्षणिकमेव। अतः एव अर्थक्रियाकारी भवति। सद्वस्तुनः क्षणिकत्वप्रमाणे एतैः उच्यते - यस्मिन् कस्मिनपि क्षणे वस्तुनः परिणामः अनुभूतः। वस्तुनः प्रथमसत्ताक्षणे परिणामः नारभ्यते चेत् कदापि परिणामः न स्यात्। अतः वस्तुनः प्रथमसत्ताक्षणात् एव परिणामस्य आरम्भः भवति। एषः परिणामः यावत् पर्यन्तं सूक्ष्मतया तिष्ठति तावत् न प्रतीयते। प्रतिक्षणं वस्तुनः परिणामे सति यदा परिणामः बृहदाकारः भवति, तदा प्रत्यक्षगोचरः भवति। वस्तुनः निरवच्छिन्नपरिणामाभावे क्षयः बृद्धिः वा न स्यात्।

वस्तुनः प्रत्यक्षे वैभाषिकसौत्रान्तिकयोः मतभेदः दृश्यते। वैभाषिकाः कथयन्ति यत् वस्तुनः अपरोक्षप्रत्यक्षं न भवति, परोक्षप्रत्यक्षं भवति। यतो हि वस्तु यस्मिन् क्षणे उत्पद्यते, ततः परस्मिन् क्षणे नाशं प्राप्नोति। वस्तुनः अपरोक्षप्रत्यक्षवादे क्षणिकतावादं न स्यात्। परन्तु सौत्रान्तिकाः कथयन्ति यत् वस्तुनः अपरोक्षप्रत्यक्षज्ञानमेव भवति। क्षणिकसद्वस्तुनः अपरोक्षप्रत्यक्षज्ञानं न सम्भवति चेत् तस्य प्रत्यक्षज्ञानेन साकं यत्किमपि ज्ञानं न स्यात्। यतो हि पूर्वक्षणे सद्वस्तुसन्ततेः एव आकारः इति निश्चये वस्तुनः अपरोक्षप्रत्यक्षं स्वीकरणीयम्। एतच्च बुद्धाभिमतमपि।

एतेषां मते प्रत्यक्षं द्विविधं निर्विकल्पकं सविकल्पकं चेति। निर्विकल्पप्रत्यक्षज्ञानस्य विषयः भवति स्वलक्षणम्[14]। सविकल्पकप्रत्यक्षज्ञानस्य अनुमितेः च विषयः सामान्यलक्षणम्[15]।

## ३.२.३. योगाचारः

सम्प्रदायोऽयं महायानसम्प्रदाये अन्तर्भवति। भाववादिनः एते वस्तुनः ज्ञानं निरपेक्षं ज्ञानातिरिक्तसत्तां च न स्वीकरोति। एतेषां मते विज्ञानमेव (ज्ञानमेव) परमार्थसत् वस्तु। तस्याः परमार्थसत्तायाः ज्ञानोपायः योगाभ्यासः एव। अतः दर्शनमिदं योगाचारदर्शनं विज्ञानवाददर्शनं वेत्युच्यते। एतेषां मते बाह्यार्थस्तु शून्यं भवति, किन्तु सर्वेषां वस्तूनां ज्ञाता चित्तं कदापि असत् न भवति। अन्यथा अस्माकं ज्ञानमपि असदेव स्यात्। मानसिकपदार्थः धारणामात्रं भवति। मानसिकधारणापि भ्रमवत् प्रतीयते। बिषयी बाह्यवस्तूनाम् उपरि स्वतत्सम्बन्धिधारणाम् आरोपयति। विज्ञानवादः इति नाम्नापि एतत् दर्शनम् अभिहितम्। यत्र विज्ञानं शुद्धचैतन्यं वा सत्, तद्भिन्नं सर्वं असत्। विज्ञानातिरिक्तं यत् बाह्यसद्रूपेण प्रतीयते तत् वस्तुतः विज्ञानस्य एव आकृतिः। विज्ञानातिरिक्तं किमपि नास्ति इत्यर्थः। एतन्मतानुसारेण चित्तस्य अष्ट प्रकाराः विद्यन्ते। चक्षुर्विज्ञानादीनि षट् वैभाषिकसम्मतविज्ञानानि, मनोविज्ञानम्, आलयविज्ञानं चेति।

योगाचारदर्शनस्य पूर्वसूरिणा असङ्गेन अस्य दर्शनस्य मूलसूत्राणि “महायानसंपरिग्रहशास्त्रे” आलोचितानि वर्तन्ते। तत्रोच्यते - सद्रूपेण यत् प्रतीयते, तस्मिन् आलयविज्ञानं अन्तर्हितं तिष्ठति। ज्ञानं त्रिविधं परिकल्पितं परतन्त्रं परिनिष्पन्नं चेति। प्रवृत्तिविज्ञाने यत् विषयजगत् प्रतीयते, तत् आलयविज्ञानस्यैव परिणामः। बुद्धत्वप्राप्तौ दशानां भूमीनाम् अतिक्रमः अपेक्षते। हीनयानबौद्धमतं संकीर्णं व्यक्तिकेन्द्रिकं स्वार्थदुष्टं चेति। महायानबौद्धाः एव बुद्धाचरणं वाणीं च सम्यक् ज्ञातवन्तः। विषयविषयिनोः द्वैतभावम् अतिक्रम्य शुद्धविज्ञानेन (आलयविज्ञानेन) सह अभिन्नत्वप्राप्तिः तत्त्वज्ञानम्। परमार्थसत् एव आलयविज्ञानम्। दानशीलक्षान्तिवीर्यध्यानप्रज्ञाः इति षट् निरन्तरं लक्ष्यविषयाः स्युः। एतदनुसारेण योगाचाराः ज्ञानातिरिक्तबाह्यसत्तानिरासपूर्वकं सर्वेषां ज्ञानस्वरूपतां साधयति। वैभाषिकसौत्रान्तिकप्रतिपादितयोः स्वलक्षलसामान्यलक्षणयोः भेदः एतैः नाङ्गीक्रियते। स्वलक्षणसामान्यलक्षणौ तु ज्ञानस्यैव आकारः। माध्यमिकानां मते द्वान्दिकप्रयोगे सद्रूपेण प्रतीयमानस्य सर्वस्य स्वभावशून्यता

---

[12]शीलध्यानप्रज्ञाः साधनमार्गस्य सोपानभूताः।

[13]जागतिकशक्तिः स्वभावतः क्रियाशीला भवति। एतेषां विनाशः एव निर्वाणः।

[14]स्वलक्षणं नाम परमार्थसत्।

[15]सामान्यलक्षणं कल्पनारोपितत्वात् असत्।

सिध्यति, पुनश्च असतः एव सद्रूपेण प्रतीतिः। अस्मिन्प्रसङ्गे योगाचाराः कथयन्ति यत् - सदधिष्ठानम् अवलम्ब्य एव असतः आरोपः प्रतीतिश्च भवति। ज्ञानमेव सदधिष्ठानम्। अधिष्ठानज्ञानमेव योगाचाराणां शुद्धविज्ञानमालयविज्ञानं वा।

### ३.२.४. माध्यमिकः

सम्प्रदायोऽयं महायानसम्प्रदाये अन्तर्भवति। भाववादिनः एते वस्तुनः ज्ञानं निरपेक्षं ज्ञानातिरिक्तसत्तां च न स्वीकरोति। बुद्धाचरणं वाणीं च विचार्य न केवलं बौद्धदर्शने अपि तु भारतीयदर्शनेषु परिवर्तनं साधितवन्तः माध्यमिकाः। अतः बुद्धाचरणस्य बुद्धवाणेः चानुसरणफलमेव माध्यमिकदर्शनम्। परातत्त्वे आत्मानात्मवादं वर्जयित्वा द्वान्दिकेन भिन्नदार्शनिकसिद्धान्तानां असारता, प्रज्ञया परमार्थसतः उपलब्धिः च तैः दर्शिता। नागार्जुनसम्बन्धस्य अस्य दर्शनस्योद्भवः ईशवीयद्वितीयवर्षे जातः। एतेषां मते संसारः असत् तन्नाम शून्यं भवति। द्रष्टा दृश्यं दर्शनं सर्वं स्वप्नवत् भ्रमयुक्तं भवति। अत्र शून्यं नाम तादृशः सत् भवति, यत् सत्, असत्, सदसत्, असन्नासत् इति चतुष्कोटिविनिर्मुक्तं भवति। व्यवहारिकवस्तूनि असत् भवति, परन्तु तस्य पृष्टभूमिकायां तादृशी सत्ता वर्तते या उपाधिरहिता विकाररहिता च। यथा चोक्तं माध्यमिककारिकायाम्–

न सन्नासन्न सदसन्न चाप्यनुभयात्मकम्।
चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुः॥

संसारः नित्यः अनित्यः वा, मृत्योः परं तथागतः सत्यः मिथ्या वा, देहात्मनौ भिन्नौ अभिन्नौ वा इत्यादिषु विषयेषु बुद्धः मौनं अतिष्ठत्। यः इन्द्रियेन युक्त्या वा अगम्यः स बौद्धपरिभाषायाम् अव्याकृतः इत्युच्यते। तत्र माध्यमिकानां मतं तावत् - युक्तिस्वभावः एतादृशः भवति यत् धारणया समाधानमन्विषति चेत् विरुद्धेन सह संलग्नः स्यात् इति। तत्र विरोधः स्वं प्रति स्वस्य, अन्यसमाधानेन साकं स्वस्य वा। ततः द्वान्दिकस्य उत्पत्तिः। यत् माध्यमिकानां दर्शनम्। द्वान्दिकं नाम दर्शनयोः स्वस्वविरोधात्, पारस्परिकविरोधचेतनात् वा द्वान्दिकस्य आविर्भावः। इन्द्रियजातलौकिकाभिज्ञतया युक्त्या वा एतस्य विरोधस्य समाधानं न भवति। द्वान्दिकस्य अन्तद्वयं भवति। आत्म अनात्म वा, भावदृष्टिः अभावदृष्टिः वा इत्येतादृशः। एतादृशयोः अन्तयुग्मयोः एकस्य स्वीकारः अस्वीकारः वा, उभयस्य स्वीकारः अस्वीकारः वेति विकल्पचतुष्टयस्य उत्पत्तिः स्यात्। एतस्मात् एव सत्, असत्, सदसत्, न सदसत् इति चतुष्कोटिद्वान्दिकसाकारस्य प्रकाशः भवति। युक्तातीतात् उत्कृष्टात् स्तरात् माध्यमिकाः एकैकं युग्मभावेन वा विचार्य दर्शनस्य असारतां प्रतिपादयन्ति। वस्तुतः माध्यमिकानां स्वमतं नास्ति। द्वान्दिकमेव माध्यमिकानां दर्शनम्।

## ४. हीनयानमहायानसम्प्रदायौ

बुद्धस्य नीतिप्रधानोपदेशे दर्शनविशेषः आध्यात्मिकभावश्च अन्तर्हितः वर्तते। तत्र स्वरूचिगोत्रबुद्ध्यादिना बुद्धोपदेशस्य अघोषितान्तर्लीनतात्पर्यविश्लेषणेन च नव्यदर्शनस्य आविर्भावः जातः। पुनश्च बुद्धोपदेशस्य आध्यात्मिकतात्पर्ये मतभेदात् हीनयानमहायानसम्प्रदाययोः आविर्भावः जातः। तत्र वैभाषिकसौत्रान्तिकौ वस्तुवादिनौ हीनयाने अन्तर्भवतः। माध्यमिकयोगाचारौ भाववादिनौ महायाने अन्तर्भवतः। उभौ अपि बौद्धाः एव। ते स्वस्वदार्शनिकभावनया अध्यात्मतत्त्वं प्रतिपादयति। हीनयानसम्प्रदायस्य यत् अध्यात्मतत्त्वं वर्तते, तस्य प्रतिक्रियास्वरूपमेव महायानसम्प्रदायः। हीनयानस्य अर्हततत्त्वं निषेधात्मकं व्यक्तिकेन्द्रिकं च। तेषां संकीर्णाध्यात्मतत्त्वाश्रयेण स्वल्पसंख्यकानां जीवानां निर्वाणः सम्भवति। अतः एव महायानसम्प्रदायानाम् आविर्भावः। तेन महायानसम्प्रदायानाम् उदाराध्यात्मतत्त्वाश्रयेन सर्वे दुःखसमुद्रम् अतिक्रम्य निर्वाणलाभे समर्थाः स्युः।

## ५. उपसंहारः

एवं बुद्धाचारणं बुद्धवाणीं च अवलम्ब्य बौद्धदर्शनस्य आविर्भावः जातः आसीत्। कालक्रमेण बुद्धजीवनावसानात् परं तद्वाणीषु मतभेदात् सम्प्रदायभेदाः सञ्जाताः। बौद्धानां चत्वारः सम्प्रदायाः आसन्। यथा वैभाषिकसम्प्रदायः, सौत्रान्तिकसम्प्रदायः, योगाचारसम्प्रदायः, माध्यमिकसम्प्रदायश्चेति। आध्यात्मिकतात्पर्यात् च भेदद्वयं जातम्। हीनयानसम्प्रदायः महायानसम्प्रदायश्चेति। तत्र वैभाषिकसौत्रान्तिकौ हीनयानसम्प्रदाये अन्तर्भवतः, माध्यमिकयोगाचारौ तु महायानसम्प्रदाये अन्तर्भवतः। तच्च उपरि सरलतया समासेन च प्रतिपादितमिति शम्।

## ग्रन्थसूची

१. सर्वदर्शनसंग्रहः (प्रकाशहिन्दीभाष्योपेतः), प्रो. उमाशंकर शर्मा ‘ऋषि’, चौखम्बा विद्याभवन, वाराणसी, २००६.
२. बौद्धन्याय, रामकुमार राय, चौखम्बा विद्याभवन, वाराणसी, १९६९.
३. भारतीय दर्शन, देवव्रत सेन, पश्चिमवङ्ग राज्य पुस्तक पर्षत्, कलकाता, मे २०१० (जुलाइ १९७४).
४. बौद्धदर्शन ओ धर्म, स्वामी विद्यारण्य, पश्चिमवङ्ग राज्य पुस्तक पर्षत्, कलकाता, जुलाइ १९९९ (मार्च १९८४).
५. भारतीय दर्शन १, डा. राधाकृष्णन, राज्यपाल एण्ड सन्ज, कश्मीर गेट, दिल्ली-६, नभेम्बर १९२२.

# जैमिनिः

## श्रीमन्त-भद्र

श्रुत्यर्थतात्पर्यनिर्णये विभ्रान्तपिपासूनामाकाङ्क्षातृष्णाशान्तये परमकारुणिको भगवान् महर्षिर्जैमिनिर्जनिं लब्ध्वा कौत्सकुलमलञ्चकार। भगवत्कृष्णद्वैपायनपाराशर्यव्यासशिष्योऽयं मीमांसाशास्त्रप्रस्थापकः आसीत्। तदुद्धृतं नीलकण्ठशास्त्रिणा 'Jaimini and Badarayana' इत्याख्ये निबन्धे– 'सोऽयं प्राजापत्यो विधिः ताम् इमां प्रजापतिः बृहस्पतये प्रोवाच, बृहस्पतिर्नारदाय, नारदो विश्वकसेनाय, विश्वकसेनो व्यासाय पाराशर्याय, व्यासः पाराशर्यो जैमिनये, जैमिनिः पौष्पिण्ड्याय पाराशर्यायणाय...'[16] इति। व्यासः स्वशिष्याय जैमिनये सामवेदं प्रददौ इति श्रीमद्भागवताद्विज्ञायते–

पराशरात्सत्यवत्यामंशांशकलया विभुः।
अवतीर्णो महाभागो वेदञ्चक्रे चतुर्विधम्॥
तेषां स चतुरः शिष्यान् उपाहूय महामतिः।
एकैकां संहितां ब्रह्मन् एकैकस्मै ददौ विभुः॥
साम्नां जैमिनये प्राह ततः छन्दोगसंहिताम्॥ (श्रीमद्भागवतम्- २.६.४९,५५) इति।

महर्षिरयं जनमेजयायोजितसर्पसत्रस्योद्गाता आसीदिति भारताज्ज्ञायते–

उद्गाता ब्राह्मणो वृद्धो विद्वान् कौत्सोऽथ जैमिनिः (महाभारतम्- १.५३.६) इति।

### देशः

महर्षिर्जैमिनिः कुत्रत्यः आसीदित्यस्मिन् विषये किमपि तथ्यं नोपलभ्यते।

### कालः

भारतीयविदुषां समयनिर्धारणमतिकष्टसाध्यं, यतस्तैः स्वविषये किमपि न लिखितम्। अस्यां स्थितौ अन्यकृतैरुल्लेखैः अनुमानेन च प्राचां दार्शनिकानां समयो व्यवस्थापनीयो भवति। अस्मादेव हेतोः जैमिनेः समयविषयेऽपि मतभेदा विद्यन्ते–

१) कालिदासः रघुवंशे जैमिनिमुल्लिलेख– 'महीं महेच्छः परिकीर्य सूनौ मनीषिणे जैमिनयेऽर्पितात्मा' (रघुवंशम्- १८.३३) इति। अतःचतुर्थपञ्चमशतकीयात् कालिदासात् प्राचीनो जैमिनिरिति सिद्ध्यति।

२) जैमिनसूत्रभाष्यं विरचयता शबरेण पाणिनिकात्यायनौ स्मृतौ– 'सद्वादित्वाच्च पाणिनेर्वचनं प्रमाणम्, असद्वादित्वान्न कात्यायनस्य' (शाबरभाष्यम्- १०.८.१) इति। जैमिनिना च पाणिनेरुल्लेखो न विहितः। अतः पाणिन्यपेक्षया जैमिनिः प्राचीनः इति सिद्ध्यति। पी. वी. काणेमहोदयः पाणिनेः क्रिस्तपूर्वषष्ठशतकोत्पन्नत्वं मनुते, ततः अपि प्राक्तनो जैमिनिरिति सिध्यति।

३) आश्वलायनगृह्यसूत्रे जैमिनेरुल्लेखो वर्तते– 'प्राचीनावीतिसुमन्तुजैमिनिवैशम्पायनपैलसूत्रभाष्यभारतमहाभारत-धर्माचार्या इति' (आश्वलायनगृह्यसूत्रम्- ३.४.५) इति। आश्वलायनश्च पाणिनेरपि प्राचीनः। यतोहि आश्वलायनशब्दव्युत्पादनाय अश्वलशब्दात्फक्प्रत्ययविधानाय पाणिनिना नडादिगणे अश्वलशब्दस्य ग्रहणं कृतम्। किञ्च

४) किञ्च पाणिनेर्गुरुः आसीदुपवर्षः इति प्रसिद्धिः। सोऽपि जैमिन्यपेक्षया अर्वाचीनः। यतोहि शबरेण मीमांसासूत्रभाष्ये वृत्तिकारः भगवान् इत्याद्युपाधिना उपवर्षः सम्बोध्यते– 'अथ गौरित्यत्र कः शब्दः? गकारौकारविसर्जनीया इति भगवानुपवर्षः' (शाबरभाष्यम्- १.१.५) इति। एवञ्च उपवर्षादपि जैमिनिः प्राचीनः।

एवं समीक्षया जैमिनिः ख्रीष्टपूर्वदशशतकात् पूर्वमेव आसीत् न परतः इति सिद्ध्यति। गजाननमहोदयस्तु ५००० ई. पू. समये जैमिनिरासीदित्यभिप्रैति।

### कृतिः

भगवता जैमिनिना द्वादशाध्यायात्मिका शताधिकाधिकरणोपेता सप्तविंशतिशतसूत्रात्मिका द्वादशलक्षणी निरमायि। 'अत उपपन्नं जैमिनिवचनमाकृतिः शब्दार्थः' (शाबरभाष्यम्- १.१.५) इति शबरवचनेन जैमिनेः सूत्रकर्तृकत्वं निर्विवादसिद्धम्। तत्र प्रथमेऽध्याये विध्यादेः प्रामाण्यं निरूपितं, द्वितीये तद्विधेयकर्मभेदः प्रपञ्चितः, तृतीये विहितानां शेषशेषिभावः, चतुर्थे क्रतुप्रयुक्तानुष्ठेयानां पुरुषार्थप्रयुक्तानुष्ठेयानां च पदार्थानां परिमाणं चिन्तितं, पञ्चमे अनुष्ठानक्रमचिन्ता, षष्ठे विहितकर्मफलभोक्तृत्वरूपाधिकरणनिरूपणं, सप्तमे प्रत्यक्षवचनातिदेशशेषनामलिङ्गातिदेशविचारः, अष्टमे स्पष्टास्पष्टप्रबललिङ्गा-तिदेशापवादविचारः, नवमे ऊहविचारारम्भसामोहमन्त्रोहतत्प्रसङ्गविचारः, दशमे बाधहेतुद्वारलोपविस्तारबाधकारणकार्यैकत्व-समुच्चयग्रहादिविचारः, एकादशे तन्त्रादिचिन्ता, द्वादशे प्रसङ्गतन्त्रिनिर्णयसमुच्चयविकल्पविचारः। जैमिनीयश्रौतसूत्रम्,

[16] Prof. R. A. Nilakantha Sastri, Jaimini and Badarayana, p. 173, I.A. Vol. L. 1921

जैमिनीयगृह्यसूत्रम् इत्यपि जैमिनेः कृतिरिति विद्वांसो वदन्ति। ज्यौतिषशास्त्रज्ञोऽयं 'जैमिनीयसूत्रम्' इति ग्रन्थं विरचयाञ्चक्रे इति सम्प्रदायः। अयञ्च ग्रन्थः काशीहिन्दुविश्वविद्यालयस्य भूतपूर्वज्यौतिषाध्यापकेन रामयत्न-ओझामहोदयेन चौखम्बाप्रकाशनतः प्रकाशितः।

अयञ्च गजेन मारितः इति पञ्चतन्त्रोपाख्यानाद्विज्ञायते– 'मीमांसाकृतमुन्ममाथ सहसा हस्ती मुनिं जैमिनिम्' इति।

# महाभाष्यग्रन्थपरिचयः

## मलय-पोडे

संस्कृतसाहित्यवारिधौ प्राप्यन्ते बहूनि शास्त्ररत्नानि। तानि पुनः भिन्नभिन्नदर्शनेषु अन्तर्भवन्ति। दर्शनं सम्प्रदायभेदेन भिद्यते। यथा वेदान्तिना ब्रह्मवादोपस्थापनं, साङ्ख्यानां प्रकृतिपुरुषविवेचनं, नैयायिकानां कर्तृत्वविचारः, मीमांसकानां कर्मवादः, यौगिकानाम् ईश्वरसिद्धिः चेत्यादि।

सर्वेषु एव सम्प्रदायेषु केचन प्रमाणभूता आचार्या भवन्ति। तथा न्यायशास्त्रे गौतमः, योगशास्त्रे पतञ्जलिः, वेदान्तशास्त्रे आचार्यशङ्करः। तेषां यद्दर्शनं तदेव तत्तत्साम्प्रदायिकैः अनुस्त्रियते।

एवं व्याकरणदर्शनेऽपि सन्ति प्रमाणभूता आचार्याः। यद्यपि बहवः व्याकरणग्रन्थाः प्राप्यन्ते तथापि अद्यत्वे पाणिनीयव्याकरणैव प्रचारः प्रसारश्च अधिकः अवलोक्यते।

पाणिनिव्याकरणं त्रिमुनि व्याकरणम् इति कथ्यते। अर्थात् त्रयाणां मुनीनां प्रामाण्यम् अस्मिन् सम्प्रदाये। मुनित्रयं तावत् सूत्ररचयिता पाणिनिः, वार्तिककारः कात्यायनः, महामुनिः पतञ्जलिश्च। एतेषु "यथोत्तरं मुनीनां प्रामाण्यमिति[17]" न्यायेन पतञ्जलेरेव प्रामाण्यं स्वीक्रियते। पतञ्जलेरेव कृतिः महाभाष्यम्।

एवं हि प्रसिद्धिः पतञ्जलिः शेषनागस्य अवतारः। एकदा शेषाङ्के शयानः विष्णुः भगवतः शिवस्य ताण्डवनृत्यं ददर्श। तद्दर्शनेन परमानन्दमनुभवन् स शेषनागमवोचत् त्वमपि शिवनृत्यं पश्येति। तदर्थं त्वया पृथिव्यां मनुष्यरूपेण अवतरणीयम्। तत्र शिवाराधनेन शिवस्य सन्तोषं विधास्यति चेत् तव ताण्डवनृत्यदर्शनवासना पूर्तिं यास्यति तथा जगत उपकाराय पाणिनीयसूत्राणां तथा कात्यायनप्रणीतवार्तिकानामुपरि भाष्यलेखनकौशलमपि अवाप्सति।

एवं भगवतः विष्णोः कृपया पृथिव्यामवतीर्य शेषः पतञ्लजिनाम्ना प्रसिद्धः शिवमाराधयन् तदाशिषा महाभाष्यं रचितवान्।

### महाभाष्यस्य महाभाष्यत्वम्

भाष्यस्य लक्षणं तावत्–

सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥ इति

अर्थात् यस्मिन् ग्रन्थे लक्ष्यसिद्ध्यर्थं सूत्रानुसारिपदैः सूत्रार्थो वर्ण्यते, तदेव भाष्यमित्युच्यते। अर्थात् सूत्रस्थपदानां कीदृशार्थस्वीकारे सूत्रं निर्दुष्टं भवेत् तादृशव्याख्यानमेव भाष्ये क्रियते। किञ्च तत्र प्रसङ्गवशाच्च स्वपदानि अपि वर्ण्यन्ते। यथा "स्थानेऽन्तरतमः"[18] इति सूत्रे अन्तरतमे स्थाने इति अन्वयस्वीकारे इष्टसिद्धिः उत स्थाने अन्तरतमः इति यथान्यासे, "वृद्धिरादैच्"[19] इत्यत्र वृद्धिपदम्, आदैच् पदं च किमर्थमिति इत्यादिविषयाः तत्र आक्षेपसमाधानमुखेन प्रतिपादिताः दृश्यन्ते। एवं कुत्रचित् स्वरचितपदानां व्याख्यानमपि भाष्ये क्रियते। यथा पस्पशाह्निके पतञ्जलिना "अथ शब्दानुशासनम्" इति वाक्यं लिखितम्। ततः अथशब्दस्य विचारः स्वयमेव कृतः। एवं महाभाष्यावलोकनेन एतानि उदाहरणानि भूयशः दृग्गोचराणि भवन्ति।

संस्कृतवाङ्मये विभिन्नशास्त्राणामुपरि भाष्यग्रन्था उपलभ्यन्ते। यथा कात्यायनश्रौतसूत्रस्य कर्कभाष्यम्, न्यायदर्शनस्य वात्स्यायनभाष्यम्, वैशेषिकदर्शनस्य प्रशस्तपादभाष्यं, मीमांसाशास्त्रस्य शाबरभाष्यम् इत्यादि। परन्तु अस्यैव व्याकरणभाष्यग्रन्थस्य महाभाष्यमिति अभिधानम्। तत्कथम् -

अस्योत्तररूपेण बहूनि मतानि वक्तुं शक्यन्ते-

१) सर्वेषु भाष्यग्रन्थेषु आदौ सूत्राणां स्थितिः, ततः भाष्यस्य, ततश्च वार्तिकानां, परन्तु अस्मिन् आदौ सूत्राणां ततः वार्तिकानां, ततश्च भाष्यस्य उपस्थितिः दृश्यते।

२) अन्येषु भाष्यग्रन्थेषु सूत्राणां वार्तिकानां वा मण्डनमेव विधीयते परन्तु अस्मिन् भाष्यग्रन्थे मध्ये मध्ये सूत्राणां वार्तिकानां प्रत्याख्यानमपि दृश्यते।

एवम् अन्येभ्यः भाष्यग्रन्थेभ्यः वैलक्षण्यात् अस्य भाष्यग्रन्थस्य महत्त्वम्। अस्मिन् प्रसङ्गे भर्तृहरिकृतवाक्यपदीयस्य व्याख्याकर्त्रा पुण्यराजेनोच्यते-

"अत एव सर्वन्यायबीजहेतुत्वादेव महच्छब्देन विशिष्य महाभाष्यमित्युच्यते लोके। अथ महत्त्वमेव अस्योपपादयितुमाह"[20]इति।

---

[17]महाभाष्ये १-१-२९, प्रदीपटीका

[18]अष्टाध्याय्याम् १। १। ५० सूत्रम्

[19]तत्रैव १। १। १ सूत्रम्

[20]पूण्यराजटीका, वाक्यपदीयम् -२। ४८५

नागेशः कथयति– “व्याख्यातृत्वेऽप्यस्येष्टादिकथनेनान्वाख्यातृत्वादितरभाष्यवैलक्षण्यम्“[21] इति

## महाभाष्यस्य अनेकधा लोपस्तदुद्धारश्च

ऐतिहासिकमते महाभाष्यस्य अध्ययनाध्यापनपरम्परा वारत्रयं लुप्ता जाता आसीत्। तथाहि–

१. भर्तृहरेराचार्यस्य लेखाज्ज्ञायते यद् बैजिसौभवहर्यक्षप्रभृतिभिः शुष्कतार्किकैर्महाभाष्यस्य प्रचारो विनष्ट आसीत्। चन्द्राचार्येण महता परिश्रमेण दक्षिणस्य कस्माचित् पर्वतप्रदेशात् हस्तलेखं प्राप्य पुनः प्रचारः कृतः। तथा हि -

बैजिसौभवहर्यक्षैः शुष्कतर्कानुसारिभिः।
आर्षे विप्लाविते ग्रन्थे संग्रहप्रतिकञ्चुके॥
यः पतञ्जलिशिष्येभ्यो भ्रष्टो व्याकरणागमः।
काले स दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थितः॥
पर्वतादागमं लब्ध्वा भाष्यबीजानुसारिभिः।[22] इति।

चन्द्राचार्येण काश्मीरनृपतेः अभिमन्योः आदेशेन ग्रन्थस्यास्य उद्धारो विहितः। तथाह्युच्यते -

चन्द्राचार्यादिभिर्लब्ध्वादेशं तस्मादागतम्।
प्रवर्तितं महाभाष्यं स्वं च व्याकरणं कृतम्॥[23] इति

२. वैक्रमाब्दस्याष्टमे शतके महाभाष्यस्य प्रचारः पुनः विलुप्तः। काश्मीरस्य महाराजो जयापीडो देशान्तरात् क्षीरनामानं शब्दविद्योपाध्यायमाहूय विच्छिन्नस्य महाभाष्यस्य पुनः प्रचारमकार्षीत्। तथाहि -

“देशान्तरादागमय्याथ व्याचक्षाणान् क्षमापतेः।
प्रावर्तयत विच्छिन्नं महाभाष्यं स्वमण्डले॥
क्षीराभिधानाच्छब्दविद्योपाध्यायात्सम्भृतश्रुतः।
बुधैः सह ययौ वृद्धिं स जयापीडपण्डितः॥“ इति

३. वैक्रमसंवत्सरस्य अष्टादशशतके एकोनविंशतितमे शतके च सिद्धान्तकौमुदीलघुशब्देन्दुशेखरादिग्रन्थानाम् अत्यधिकं प्रचारः प्रारब्धस्तदा महाभाष्यस्य अध्ययनम् अध्यापनं च लुप्तमेव जातम्। तस्य उद्धारः परमहंसदण्डिना स्वामिविरजानन्दसरस्वतिमहाभागेन, तच्छिष्येण महर्षिदयानन्दसरस्वतिमहाभागेन च सम्पादितः।

## महाभाष्यलेखनपद्धतिः

महाभाष्ये साकल्येन ३९९५ सूत्राणि सन्ति। एतेषु पतञ्जलिः साकल्येन १७१२सूत्राणां भाष्यं लिखितवान्। तेषु १०७ सूत्राणां प्रत्याख्यानं च कृतम्। पाणिनिरचिताष्टाध्यायी अष्टाध्यायात्मिका। प्रत्यध्यायं चत्वारः पादाः सन्ति। एवं साकल्येन अष्टाध्याय्यां द्वात्रिंशत् पादाः सन्ति। पतञ्जलिस्तु एतानि सूत्राणि पञ्चाशीत्याह्निकेषु विभक्तानि। आह्निकं नाम अह्ना निर्वृत्तम् इति। अर्थात् एकस्मिन् दिने येषां सूत्राणां पठनं पाठनं वा भवति स्म तानि एव सूत्राणि आदाय आह्निकमिति व्यवहारः।

## आह्निकविभागः

| अध्यायः | पादः | आह्निकम् | | अध्यायः | पादः | आह्निकम् |
|---|---|---|---|---|---|---|
| प्रथमाध्याये | प्रथमपादे | नव (१-९) | | द्वितीयाध्याये | प्रथमपादे | त्रयम् (१९-२१) |
| | द्वितीयपादे | त्रीणि (१०-१२) | | | द्वितीयपादे | द्वयम् (२२,२३) |
| | तृतीयपादे | द्वयम् (१३-१४) | | | तृतीयपादे | त्रयम् (२४-२६) |
| | चतुर्थपादे | चत्वारि (१५-१८) | | | चतुर्थपादे | द्वयम् (२७,२८) |
| तृतीयाध्याये | प्रथमपादे | षट् (२९-३४) | | चतुर्थाध्याये | प्रथमपादे | चतुष्टयम् (४१-४४) |
| | द्वितीयपादे | त्रयम् (३५-३७) | | | द्वितीयपादे | द्वयम् (४५,४६) |
| | तृतीयपादे | द्वयम् (३८,३९) | | | तृतीयपादे | द्वयम् (४७,४८) |
| | चतुर्थपादे | एकम् (४०) | | | चतुर्थपादे | एकम् (४९) |
| पञ्चमाध्याये | प्रथमपादे | द्वयम् (५०,५१) | | षष्ठाध्याये | प्रथमपादे | षट् (५७-६२) |
| | द्वितीयपादे | द्वयम् (५२,५३) | | | द्वितीयपादे | द्वयम् (६३,६४) |
| | तृतीयपादे | द्वयम् (५४,५५) | | | तृतीयपादे | त्रयम् (६५-६७) |
| | चतुर्थपादे | एकम् (५६) | | | चतुर्थपादे | चतुष्टयम् (६८-७१) |

[21] नागेशभट्टकृतोद्योतटीकायां कैयटकृतमङ्गलश्लोकव्याख्यानवेलायाम्
[22] वाक्यपदीयम् २। २८७-२८९
[23] राजतरङ्गिणी, १। ११६

| अध्यायः | पादः | आह्निकम् | | अध्यायः | पादः | आह्निकम् |
|---|---|---|---|---|---|---|
| सप्तमाध्याये | प्रथमपादे | द्वयम् (७२,७३) | | अष्टमाध्याये | प्रथमपादे | द्वयम् (७९,८०) |
| | द्वितीयपादे | द्वयम् (७४,७५) | | | द्वितीयपादे | द्वयम् (८१,८२) |
| | तृतीयपादे | द्वयम् (७६,७७) | | | तृतीयपादे | द्वयम् (८३,८४) |
| | चतुर्थपादे | एकम् (७८) | | | चतुर्थपादे | एकम् (८५) |

एवं साकल्येन पञ्चाशीत्याह्निकानि भवन्ति।

## प्रसिद्धानामाह्निकानां परिचयः

**प्रथमाह्निके**–प्रथमाह्निकं पस्पशाह्निकमिति नाम्ना प्रसिद्धम्। पस्पशा नाम व्याकरणशास्त्रं व्याकरणाध्येतारं वा यत् आधिक्येन स्पृशति इति। अर्थात् शास्त्रपठने सम्भाव्यमानान् क्लेशान् च अपाकरोति पस्पशाह्निकम्। अस्मिन् ग्रन्थे शब्दस्वरूपं, व्याकरणाध्ययनस्य पञ्च मुख्यप्रयोजनानि, त्रयोदश गौणप्रयोजनानि, शब्दानुशासनप्रकारः, शब्दार्थसम्बन्धः, शब्दस्य नित्यत्वं चेत्यादयो व्याकरणशास्त्रस्य बहुचर्चिता विषयाः प्रतिपादिताः।

**द्वितीयाह्निके**–प्रत्याहारसूत्राणामुपरि विवेचनं दृश्यते। अत्र चतुर्दशमाहेश्वरसूत्राणि आलोचितानि।

**अष्टमे आह्निके** स्थानिवद्भावविषये आलोचना कृता।

**एकादशाह्निकं** प्रातिपदिकसंज्ञाह्निकमिति नाम्ना प्रसिद्धम्। अत्र प्रातिपदिकसंज्ञाविधायकसूत्राणि, तत्सम्बन्धिकार्यविधायकानि च कानिचित् सूत्राणि आलोचितानि।

**चतुर्दशाह्निके**–आत्मनेपदनियामकसूत्राणां परस्मैपदनियामकसूत्राणां च विचारः दृश्यते।

**सप्तदशाह्निके**–कारकम् आलोचितम्

**नवदशाह्निके**–समर्थः पदविधिः इति एकमेव सूत्रमालोचितम्। एवं तत्र तत्र आह्निकेषु बहवः विषयाः प्रतिपादिताः।

महाभाष्ये भाषाशैली

यद्यपि पातञ्जलमहाभाष्यं व्याकरणशास्त्रस्यैव मान्यो ग्रन्थो विद्यते, तथापि अन्यव्याकरणग्रन्थवदयं शुष्को नास्ति। अत्र व्याकरणसदृशस्य क्लिष्टस्य विषयस्यात्यन्तसरलसरसप्राञ्जलया शैल्या प्रतिपादनं कृतमस्ति। अस्य भाषा दीर्घपदसमासरहिता, लघुलघुतरवाक्यकदम्बकैर्गुम्फिता, प्रश्नोत्तरसनाथा, सरसा, सरला, मञ्जुला च वर्तते। लेखनशैलीदृष्ट्या ग्रन्थोऽयं संस्कृतवाङ्मये अद्भुतो वर्तते। न कोऽपि ग्रन्थः एतद्रचनाशैलीमनुकर्तुं समर्थोऽस्ति। एतेन व्याकरणमहाभाष्यं समस्तसंस्कृतवाङ्मयेष्वादर्शभूतमस्ति।

## महाभाष्यस्य वैशिष्ट्यम्

महामुनिना पतञ्जलिना पाणिनीयव्याकरणव्याख्यानव्याजेन महाभाष्ये सम्पूर्णाष्टाध्याय्याः सारः संगृहीतोऽस्ति। महाभाष्ये अनेकेषां प्राचीनवैयाकरणानामुल्लेखोऽस्ति, अनेकेषां प्राचीनग्रन्थानामनेकानि वचनानि च उद्धृतानि। महाभाष्यस्य सूक्ष्मपर्यालोचनेन प्रतीयते यदयं ग्रन्थो न केवलं पाणिनीयव्याकरणशास्त्रस्यैव प्रामाणिको ग्रन्थोऽस्ति, अपि तु समस्तानां विद्यानामाकरग्रन्थोऽस्ति। अत एव भर्तृहरिणा उक्तं -

कृतेऽथ पतञ्जलिना गुरुणा तीर्थकारिणा।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने॥[24] इति।

## महाभाष्यस्य टीकाग्रन्थाः

१) महाभाष्यस्य आदिमः व्याख्याकारः भर्तृहरिः। तदीयभाष्यस्य नाम महाभाष्यदीपिका इति।
२) महाभाष्यस्य द्वितीयटीकाकाररूपेण कैयटकृतकैयटग्रन्थः अद्यत्वे सुप्रसिद्धः।

एतदतिरिक्ता शिवरामेन्द्रविरचिता महाभाष्यटीका, भट्टोजिदीक्षितस्य शब्दकौस्तुभः, नीलकण्ठवाजपेयिनः भाष्यतत्त्वविवेकः, शेषविष्णोः महाभाष्यप्रकाशिका, शिवरामेन्द्रसरस्वतीकृतः महाभाष्यसिद्धान्तरत्नप्रकाशः, गोपालकृष्णशास्त्रिणः शाब्दिकचिन्तामणिः, सदाशिवविरचित-महाभाष्यगूढार्थदीपिनी चेति टीकाग्रन्था अपि विरचिता आसन्। एतेषु केचन ग्रन्था अद्यत्वे न पुस्तकालयेषु न प्राप्यन्ते। केचन तु शोधप्रतिष्ठानादिषु संरक्षिताः सन्ति।

## उपसंहारः

महाभाष्ये प्रायः प्रत्येकस्मिन् सूत्रे नूतननूतनतत्त्वानां वर्णनं विद्यते। ग्रन्थस्यास्य गाम्भीर्यं दृष्ट्वैव कैयटन लिखितं "भाष्याब्धिः

---

[24] वाक्यपदीये २। ४८६

क्कातिगम्भीरः“ इति। यत्रैव महाभाष्यविषये किञ्चित् पश्यामि तत्रैव नूत्ना विषयाः दृग्गोचरीभवन्ति। तथापि केचन विशिष्टा एवांशा अत्र प्रतिपादिता इति शम्।

# प्रतिबन्धकः
## सौमित्र आचार्यः

पलाशपुरनामधेयः कश्चित् ग्रामः। तत्र पुष्करिण्यां बहुषु पुष्पेषु पद्मपुष्पमिव रमेशः सर्वेषां प्रियः आसीत्। सः अतीव मेधावी आसीत्। यदा स दशवर्षदेश्यस्तदा तस्य पिता दिवं गतः। गृहे तस्य एका भगिनी माता च। दारिद्र्यकारणात् तासां जीवनं बहु कष्टेन चलदासीत्। पितृवियोगात् अर्थाभावेन पीडितः सन् स विद्यालयं गन्तुकामोऽपि असमर्थः अभवत्। परन्तु विद्यालयस्य प्रधानशिक्षकः तस्मै अतीव स्निह्यति स्म। तस्यैव अर्थसाहाय्येन रमेशः विद्यालये पाठं समापितवान्। तत उन्नतविद्यालयः गन्तव्यः। अर्थो हि लोके पुरुषस्य बन्धुः परन्तु तत्रापि स एव अर्थाभावः तम् अध्ययनाद् बाधते स्म। तस्मात् स कानिचिद्दिनानि विद्यालयं गत्वापि पुनर्न गतवान्। एवं कतिषुचिदेव दिनेषु तस्य प्रतिभा विद्यालये विश्रुता अभवत्। तस्य प्रतिभां वीक्ष्य विद्यालयस्य काचित् शिक्षिका तस्मिन् पुत्रवत् स्निहितुमारब्धवती। तस्य पठनाय सा धनसाहाय्यमपि कृतवती। रमेशः पुनः पठनमारब्धवान्। प्रतिभाबाहुल्यात् सर्वस्मिन् विषये स प्रथमस्थानमेवाधिकरोति स्म। एवमध्ययनेन उन्नतविद्यालये बहु मानमपि तेन अर्जितम्।

उन्नतविद्यालये पठनं समाप्य महाविद्यालयेऽपि संस्कृतविषयमाधारीकृत्य तस्या एव शिक्षिकाया अर्थसाहाय्येन स पठनं समापितवान्। एवमेव विश्वविद्यालयेऽपि सः अध्ययनं सम्पादितवान्। तदनन्तरं स चिन्तितवान् यत् प्रथमं जीविका लब्धव्या। तेन मातृसमशिक्षिकायै सर्वं स्वीकृतं धनं प्रत्यर्पणीयम्। पुनः यथा तत्सदृशा ये छात्रा धनाभावेन पठने क्लेशमनुभवन्ति तेषामध्ययने यथा क्लेशो न स्यात् तदर्थम् अर्थस्य विद्याया च दानमपि करिष्यति इत्येवं विचिन्त्य जीविकाप्राप्तये बहु श्रमं विहितवान्। ततः नेपाले काठमाण्डुनगरस्य एकस्मिन् विद्यालये जीविकामपि प्राप्तवान्।

तदा एप्रिलमासस्य पञ्चविंशतितमः दिनाङ्कः। शनिवासरः। तस्मिन् दिने प्रातः महता आनन्देन विद्यालयं प्रविष्टवान् आशावान् रमेशः। परन्तु आशा तस्य निराशा जाता प्रथमदिवसे एव, यदा सप्तपञ्चाशन्निमेषाधिकैकादशवादनं तदा नेपालस्योपरि भगवतः रोषाग्निः वर्षितः। आकस्मिककम्पनेन भीताः सन्तः सर्वे जनाः स्वप्राणान् रक्षितुं स्वगृहं त्यक्त्वा इतस्ततः धावनमारब्धवन्तः। रमेशः प्रथमं चिन्तितवान् कम्पनं प्रबलं न भविष्यति। परन्तु कम्पनं कालेन प्रबलतां प्राप्नोति स्म। अयं भूकम्पः अवश्यमेव सर्वं नाशयिष्यति इति निश्चित्य सोऽपि स्वप्राणान् रक्षितुं शीघ्रं विद्यालयात् बहिर्गन्तुं प्रयत्नं कृतवान्। परन्तु भगवतः कोपः मन्ये तस्यैव उपरि आसीत्। विद्यालयाद् बहिर्गमनकाले एकः भग्नप्रस्तरखण्डः अकस्मादेव तस्य मस्तकस्योपरि पतितः। रक्तधारया तस्य समग्रं शरीरं सिक्तं जातम्। कोऽपि अवश्यमेव साहाय्यं करिष्यति इति धिया रक्ताक्तोऽपि स बहिरागन्तुं प्रयत्नं कृतवान्। केचन जनास्तं चिकित्सालयमपि प्रेषितवन्तः। परन्तु तत्र चिकित्सकाः अपि भूकम्पेन आक्रान्ताः। ते स्वविषये एव चिन्तामग्नाः आसन्। पुनः देशस्य रक्षकाः जनान् उद्धर्तुं समागताः। एनं दृष्ट्वा पुनरुज्जीवनं शक्यमिति धिया अन्यत्र प्रेषितः। परन्तु दैवे दुर्जनतां गते तृणमपि प्रायेण वज्रायते। अतः बहु प्रयत्नेनापि अन्तिमः प्राणवायुः तस्य शरीरात् निर्गतः। तेन सह तस्य आशा अपि मृता। भगवति रुष्टे सति न केनापि किमपि कर्तुं शक्यते, नापि धनेन नापि जनेन च।

गृहे माता स्वपुत्रं रमेशं प्रति आशां कृतवती तस्य साहाय्येनैव तस्य भगिनी परिणीता स्यात्। सा न ज्ञातवती यत् तस्या आशा स्वपुत्रमरणेन निराशतां गमिष्यति। अनन्तरं स्वपुत्रस्य शवं निश्चित्य नयन्तु इति वार्ता आगता। तदा सा प्रथमम् अविश्वस्ता अपि स्वपुत्रदर्शनेन विश्वस्ता जाता। इदानीं कथं स्वजीवनं स्वकन्यायाश्च विवाहो भविता इति विचिन्त्य विचिन्त्य भिक्षामार्गेण सम्पाद्यमिति निश्चित्य स्थिता। ततः परस्मिन् दिने प्रातः रमेशस्य विद्यालयस्य शिक्षिका आगता। आगत्य सूचितं तस्य पुत्रः मृतोऽपि अमृत इव जातः। तदा तस्य मात्रा कथमिति पृष्टे तया उक्तं, "रमेशः स्वभविष्यज्जीवनं विचिन्त्य एकां योगक्षेमनिधिं कृतवान् आसीत्। इदानीं तस्य दुर्घटनायां मृत्युकारणात् ततः पञ्चलक्षरूप्यकमितं धनं तत्परिवाराय प्रदास्यते। तेन स मृतो भूत्वाऽपि स्वपरिवाराय कार्यं करोति।" एतच्छ्रुत्वा तस्य माता रमेशस्य मातृत्वं धन्यममन्यत। ततः तत्पत्रमन्विष्य तच्च दर्शयित्वा धनम् आनयत्। तेन भगिन्याः विवाहः स्वमातृजीवनं च सम्यक् जातम्। तस्मादुच्यते उदारचरितानां तु वसुधैव कुटुम्बकम्।

# द्वयोस्तृतीयो न भवेत्

## सनातन-दाशः

वङ्गीयाः सरलाः कोमलाः ललिताः सुकुमाराश्च। ते यथा प्रतिवेशिनां दुःखं स्वकीयमिव चिन्तयन्ति तथैव पीडिताहतजनानां दुःखेन दुःखिता भवन्ति। यद्यपि तेषु जातिविरोधोऽस्ति तथापि पूजापार्वणेषु सामाजिककार्यक्रमेषु च ते सुतरां निरहंकाराः सन्त आत्मीयतां दर्शयन्ति। जातोत्सवादिषु आनन्दानुष्ठानेषु आनन्दिताः, सुखेषु सुखिनो भवन्ति नाम वङ्गीयाः। एवमेव कोमलमतयो वङ्गीयाः सुखेषु सुखिनो दुःखेषु दुःखिनः सन्तः सहायताञ्च कुर्वन्ति इतरेषाम्। एतादृशानां वङ्गीयानां चरित्रे रमणीयमेकं वैशिष्ट्यं सर्वेषां नयनपथमवगाहति। तत्तु कर्मण्यन्येषां चञ्चुप्रवेशनम्। "अपरेर कथाय नाक गलानो" इति स्वयमेव वदन्ति वङ्गवासिनः। यत्र कुत्राप्यन्येषां कर्मसु, वाक्यालापेषु, क्रीडादिषु च ते अति सारल्येन कोमलतया चञ्चुचालनं कुर्वन्ति। नाम अन्येषां कर्मणि उपयाचकतया स्वमतं स्थापयन्ति प्रतिपादयन्ति वा। फलरूपेण, उपायनरूपेण वा कुत्रापि स्वकीयावमानना कुत्रापि च स्वजातितिरस्कारः तैः लभ्यते। वस्तुतः नैष दोषः केवलम् इदानीन्तनकाले, न वा केवलं वङ्गीयानाम्। प्राचीनभारतेषु राजसु बहुत्र मन्त्रिषु, पुरोहितेषु, अमात्यादिषु च परिलक्ष्यतेऽयं दोषः। विषयेऽस्मिन् राज्ञो विक्रमादित्यस्य काचन कथा स्मरणीया।

कदाचित् सभास्थो नृपो विक्रमादित्यः पत्न्या सह वार्तालापं कर्तुमन्तःपुरं गतवान्। संलग्नमना राज्ञी तदा सख्या सह वार्तालापं कुर्वती आसीत्। विस्मयाविष्टेन वक्तुकामेन राज्ञा सहसा तयोर्मध्ये स्वभाषणं प्रदत्तम्। तच्छ्रुत्वा राज्ञी राज्ञः सम्मुखे केवलं पदद्वयं निगदितवती "मूर्खस्त्वम्" इति। मर्माहतः चकितश्च राजा झटिति स्थानं परित्यज्य सभां प्रत्यागतवान्। नासीत्तदा तस्य मनः सभायामालोच्यविषये। मनसा सर्वदैव चिन्तयन्नासीत् यद् विना कारणं राज्ञी किमर्थं माम् "मूर्खः" इति उक्तवती। केवलं सभाकविना कालिदासेनैव प्रश्नस्यास्योत्तरं दातुं शक्यम् इति। परन्तु कस्तावत् वदति स्वावमाननां, सापि नारीशकासात्? कौशलेन चातुर्येण वा ज्ञेयमस्योत्तरम्। अतो राजैकदा तेन सह वार्तालापं कुर्वन्तं कालिदासं "मूर्खस्त्वम्" इत्युक्तवान्। वचनं श्रुत्वा कालिदासस्य महान् क्रोधः सञ्जातः। सक्रोधमुवाच स श्लोकमिमम्–

खादन्न गच्छामि हसन्न जल्पे<br>
गतं न शोचामि कृतं न मन्ये।<br>
द्वयोस्तृतीयो न भवामि राजन्<br>
केनास्मि मूर्खो वद कारणेन॥

अस्यायमर्थः "राजन्! विनैव कारणेन मां किमर्थं मूर्खस्त्वम् इत्युक्तवान्? अहं स्थितः खादामि (न तु खादन् गच्छामि), वार्तालापे न सहसा हसामि(हसन्न जल्पे), गच्छतः वस्तुनः कृते न शोचामि(गतं न शोचामि), कार्यं कृत्वा स्वप्रशंसां न करोमि(कृतं न मन्ये), नापि जल्पतोः द्वयोर्मध्ये भाषणं करोमि(द्वयोस्तृतीयो न भवामि)।"

तदैव राजा ततः प्रस्थितवान्। प्राप्तमिदानीं तेन स्वकीयापमानस्य कारणम्। वस्तुतस्तु विक्रमादित्यः द्वयोर्मध्ये भाषणं कृत्वा तृतीयोऽभवत्। तस्मात् राज्ञी तं "मूर्खस्त्वम्" इत्युक्तवती। इदं तावत् विक्रमादित्यचरितम्।

सत्यमेव न केवलं वङ्गीयानां, समस्तभारतीयानामेवैष दोषः त्यक्तव्यः। न चेत् उपहसनीयः सम्भविष्यति। जनद्वयस्य जल्पनकाले केनापि तृतीयेन तत्र सहसा सम्भाषणं किमपि वाचनं वा नैव शोभते। अन्येषां कर्माणि बाधः न भवेत्। तत्तु मूर्खतायाः अवमाननायाः वा लक्षणम्। अतः अस्माकं तु सर्वदैव पञ्चविन्दवः स्मर्तव्याः– (१)खादन्न गच्छामि (२)हसन्न जल्पे (३)गतं न शोचामि (४)कृतं न मन्ये (५)द्वयोस्तृतीयो न भवामि इति॥

# वञ्चकप्रवञ्चना
## सनातन-दाशः

## (प्रथमं दृश्यम्)
### नेपथ्ये

(पश्य, पश्य, बृहद्गर्तं दृष्ट्वा यानमग्रे नेतुमसमर्थौ द्वौ मूर्खौ। पश्य, पश्य,किं तावत्तौ कुरुतः?)

(यानस्थौ द्वौ प्रविशतः)

शकुनः – भो गरुड! यानमग्रे न गमिष्यति, पुरस्ताद् महान् गर्तः वर्तते। किं करवाणि?
गरुडः – रे शकुन! सिटिकां ददातु , सिटिकाध्वनिं श्रुत्वा स झटित्येव गमिष्यति।
शकुनः – अस्तु तावदहं वारं वारं सिटिकां ददामि। (अतीत्य कञ्चित् समयम्) अहो दुर्दैवम् , तैलमपि अस्मिन्क्षणे समाप्तम्। कथमिदानीं यानमग्रे गमिष्यति?
गरुडः – (सक्रोधम्) वारं वारं सिटिकां दत्त्वा तैलं समापितं त्वया। तस्मात् यानमग्रे न गमिष्यति, पश्चात्तु गमिष्यत्येव।
शकुनः – रे धूर्त! तैलं नास्ति तस्मात् यानं न केवलमग्रे पश्चादपि न गमिष्यति।
गरुडः – एवं वा, तर्हि बहिरागच्छ। तैलमावश्यकम्। आपणमन्विषावः।

(यानाद् बहिरागत्य गच्छतः। पुस्तकापणं गच्छतः कस्यचिद् जनस्य प्रवेशः)

जनः – मम समयः नास्ति। शीघ्रं पुस्तकमुपक्रीय गृहं गन्तव्यम्। अत्रैनमापणमेव गच्छामि। (निष्क्रान्तः)

नेपथ्ये

आपणिकः welcome, welcome वदतु, कानि कानि पुस्तकानि आवश्यकानि?)

(सम्भाषणं श्रुत्वा)

गरुडः – (स्वगतम्) “oil come” नाम तैलमागच्छति। तर्हि अत्र कालक्षेपणेनालम्। शीघ्रमेव गन्तव्यम्। (प्रकाश्ये) रे शकुन! शीघ्रं चल।
शकुनः – किं भो, कुत्र गन्तुमिच्छसि?
गरुडः – अरे तैलमागच्छति। शीघ्रं न गम्यते चेत् किं बिन्दुमात्रमपि तैलं प्राप्स्यावः?

कश्चन भिक्षुकः प्रविशति। तौ द्वौ दृष्ट्वा अन्धाभिनयं करिष्यति

अन्धः – (लोचनेनैकेन दृष्ट्वा)। (स्वगतम्) मन्ये द्वौ इतः एव आगच्छतः। इदानीं ताभ्यामपि भिक्षां प्रार्थये। (प्रकाश्ये) भोः पथिक! कृपया भिक्षां देहि। अन्धोऽस्म्यहं जन्मान्धः।
गरुडः – किमेष वस्तुतः अन्धः?
शकुनः – वस्तुतः नैषः अन्धः। केवलमन्धस्याभिनयं कृत्वा पथिकान् वञ्चयति। अहमेतं जानामि।
अन्धः – (इषद्दृष्ट्वा)। (स्वगतम्) अहो ममान्धत्वविषये एतयोः संशयो विद्यते। भवतु एवं वोधयामि। (प्रकाश्ये) स्वामिन्! जन्मना अन्धोऽस्मि। को नाम संशयः? अथवा संशयश्चेत्तं परिहरामि।
गरुडः – परिहरतु परिहरतु।
अन्धः – (हस्तेन दुरस्थं गृहं प्रदर्शयन्) पश्यतु तावत्। दूरे एकमुन्नतं भवनं दृश्यते खलु?
द्वौ – दृष्टं दृष्टम्। श्वेतवर्णम्। तदेव किम्?
अन्धः – (तयोः मुखं दृष्ट्वा) नैव नैव। तस्याग्रिमं पीतवर्णं भवनं तत्।
द्वौ – दृष्टमिदानीमावाभ्याम्।
अन्धः – भवद्भ्यां दृश्यते। परन्तु मया न दृश्यते। पुनः तत्र पश्यतु (आगच्छन्तं कञ्चित् बालकं प्रदर्श्य) नीलवस्त्रधारिणमागच्छन् बालकः दृश्यते वा?
द्वौ – निश्चयेन दृश्यते।
अन्धः – परन्तु मया नैव दृश्यते। अतः विचार्यतामहं जन्मान्धो न वेति। विचार्यतां मह्यं भिक्षा दातव्या न वा।
गरुडः – (रहसि शकुनमाहुय) कुतश्चित् प्राप्तमेकं संख्यारहितं धनपत्रमस्ति। तत् दास्यामि। (प्रकाश्ये) सत्यमेव भवान् जन्मान्धः। स्वीकरोतु भिक्षाम्।
अन्धः – (सपदि लोचनेनैकेन दृष्ट्वा) किमिदं भो? संख्यारहितं धनपत्रं प्रदत्तम्।
शकुनः – क्षम्यतामहं वधिरोऽस्मि। यथा भवता किमपि न दृश्यते तथैव मया किमपि न श्रूयते।

अन्धः – (उच्चैः) भोः प्रवञ्चक! असमीचीनं धनपत्रं दत्त्वा जन्मान्धं मां कथं वञ्चयति।
गरुडः – नीचैः वदतु, नीचैः वदतु। आवाभ्यां जन्मवधिराभ्यां किमपि न श्रूयते। आगच्छ शकुन!(निष्क्रान्तः)
शकुनः – अन्धः स मूर्खः। (निष्क्रान्तः)
अन्धः – वञ्चक! धूर्त! एतयोः कदापि मङ्गलं न भविष्यति। भवन्तः कदापि एतयोः विश्वासं न कुर्युः। अहमिदानीं गच्छामि, न, पुनरहमागच्छामि। प्रत्यागत्य प्रतिशोधं नयामि। (निष्क्रान्तः)

(द्वितीयं दृश्यम्)

(उपविष्टः शिलापट्टे गरुडः शकुनश्च)
गरुडः – अः...,अः.., अतीव उष्णमनुभवामि। देहात् स्वेदबिन्दुः पतति। तस्योपरि तैलस्य समस्या न परिहृता। गण्डस्योपरि पिण्डकः संवृतः।
नेपथ्ये – (व्यजनमावश्यकम्,व्यजनम्...(द्विः) विशेषहस्तव्यजनम्..., एकवारं क्रीणाति चेत् कदापि भग्नं न भविष्यति। विशेषहस्तव्याजनम्...)
शकुनः – (आकर्ण्य) रे गरुड! व्यजनमावश्यकं वा?
गरुडः – अवश्यमेवावश्यकम् मे। शीघ्रं तावदानय। अथवा समाप्ते किं त्वया गम्यते?
शकुनः – अशुभं मा शोचस्त्वम्। कुतश्चिदपि संगृह्योपस्थापयेयं ते पुरतः। साधयामि तावत्। (निष्क्रान्तः)

(किञ्चिदनन्तरं...सस्यूतव्याजनविक्रेतुः शकुनस्य च प्रवेशः)
गरुडः – व्यजनं कुत्र? व्यजनं विहाय, विना व्यजनं वा कस्तावत्त्वयानीतः?
शकुनः – नैतद् व्यजनम्, नैतद् व्यजनम्। एष खलु व्याजनविक्रेता।
गरुडः – एवं वा। कुतस्ते व्यजनं भो! शीघ्रं मे प्रदीयताम्।
विक्रेता – महाशय! विशेषहस्तव्यजनमेतत्। एकवारं क्रीणाति चेत् कदापि भग्नं न भविष्यति। मुल्यं स्वल्पमेव। शतरुप्यकाणि केवलम्।
गरुडः – (उपहासेन) सत्यं भणितं। बहु स्वल्पमेव। (रहसि) एषोऽपि वस्तुतः चौरः। (प्रकाश्ये) प्रयच्छ शीघ्रम्। (धनं प्रदाय) मन्ये उष्णतेदानीमपगता।

(व्यजनं प्रदाय विक्रेतुः प्रस्थानम्। कालमात्रं व्यवहारेण व्यजनं भग्नमभवत्)
गरुडः – (सखेदम्) शतरुप्यकाणि, भग्नमभवत्। परन्तु तेनोक्तं कदापि भग्नं न भविष्यतीति। तर्हि किमर्थम्? पश्य शकुन, पश्य।
शकुनः – तिष्ठ, तिष्ठ। आनयाम्यहमिदानीमेव तम्। पार्श्वे एव कुत्रापि भवेत्। (निष्क्रान्तः)

(विक्रेत्रा सह शकुनस्य प्रवेशः)
विक्रेता – (सविस्मयम्) किमभवत्? मम व्यजनं भग्नं जातमिति श्रुतम्। कदापि न कदापि न।
गरुडः –(सक्रोधमुच्चैश्च) रे दुष्ट! व्यजनं कदापि भग्नं न भविष्यतीति असत्यं निगद्य मां वञ्चयसि वा? पश्य भग्नं वा न वेति।
शकुनः – पश्य भग्नं वा न वेति। दुष्टः,धूर्तः, वराहनन्दनस्त्वमनृतभाषी।
विक्रेता – नैव नैव। अहं कदापि असत्यं न वदामि। मन्ये भवता अस्य प्रयोगः सम्यग् न कृतः। भवतेदं कथं व्यवहृयते? कृपया प्रदर्शय मे।
गरुडः – (समीपमपुसृत्य)माम्... शिक्षयसि त्वम्? पश्यन्तु पश्यन्तु। मूर्खः मां बोधयसि कथं व्याजनस्य उपयोगो भवतीति। तर्हि श्रृणु (अभिनयेन) मया एवमस्योपयोगः कृतः।
विक्रेता – हम्। मया ज्ञातम्। भवता दोषः कृतः। एतस्य प्रयोगः तथा न करणीयः यथा भवता कृतः।
शकुनः – तर्हि कथमस्योपयोगः भवति? (अङ्गविकृत्य) त्वयैव मुर्खेणोपस्थातव्यम्।
गरुडः – अवश्यमेव। शीघ्रं मे प्रदर्शय, महाविक्रेतः!
विक्रेता – प्रदर्शयामि। पश्यतु (साभिनयम्) प्रथमं तावत् व्यजनं मस्तकस्य पुरतः स्थापनीयम्। अनन्तरं मस्तकमेव सञ्चालनीयं न तु व्याजनम्। एवं क्रियते चेत् व्यजनं कदापि भग्नं न भविष्यति।
शकुनः – अहो अतीव चतुरोऽसि त्वम्। हा।
गरुडः – सत्यम्। (संशयेन)। (अन्धमुद्दिश्य) मन्ये त्वमसि पूर्वदृष्टः निशाचरः अन्धः।
शकुनः – सत्यं किल। अहो वञ्चक...! आवां वञ्चयसीदानीम्। कारागारे निक्षेपणीयस्त्वम्।
विक्रेता – अनुबोधितोऽस्मि। अहमेव पूर्वदृष्टः कपटान्धः। (शीघ्रं निष्क्रान्तः)
गरुडः – भो शकुन! (मस्तके कराघातः) वञ्चितेनानेन पुनरपि प्रवञ्चितावावाम्। अपगता चेदानीं तैलान्वेषणे ममेच्छा। गन्तुमसमर्थोऽहम्। माम् नय (उपविशति)।
शकुनः – गरुड! यथा यानस्य तथैव तवापि तैलं समाप्तम्। वस्तुतः एषा वञ्चकप्रवञ्चना।

(निष्क्रान्तौ)

